नमद्भक्तो लभतेंजसा ॥ स्वर्गापवर्गमद्धाम कथंचिद्यदि वांछति ॥१६॥ न किंचित्सा
धवो धीरा भक्ता ह्येकांतिनो मम ॥ वांछंत्यपि मया दत्तं कैवल्यमपुनर्भवं ॥१७॥
नैरपेक्ष्यं परं प्राहुर्निःश्रेयसमनल्पकं ॥ तस्मान्निराशिषो भक्तिर्निरपेक्षस्य मे भ
वेत् ॥१८॥ न मय्येकांतभक्तानां गुणदोषोद्भवा गुणाः ॥ साधूनां समचित्तानां बुद्धेः प
रमुपेयुषां ॥१९॥ एकादशे श्रीभगवदुद्धवं प्रति ॥ एवमेतान्मया दिष्टाननुतिष्ठंति
मे पथः ॥ क्षेमं विंदंति मत्स्थानं यद्ब्रह्म परमं विदुः ॥२०॥ इति श्रीमत्कृष्णचरणा
रविंदकृपामकरंदबिंदुप्रोन्मीलितविवेकतैरभुक्तपरमहंस
विष्णुपुरीग्रथितायां श्रीभागवतामृताब्धिलब्धश्रीभगवद्भक्तिरत्ना
वल्यां प्रथमं विरचनं ॥१॥ अथ भगवद्भक्तिकारणानि निरूप्यन्ते तत्र परमं कृपा
लुश्रीमन्नारायणकरुणाकल्प[illegible]वल्लीफलं सत्संगाग्रधा[illegible]मिति भागवतामि
न

जन्मयत्कृतं॥९॥दशमेश्रीसुकवाक्यंपरिक्षित्प्रति॥भजंतियेविष्णुमनन्यचे
तसस्तथैवतत्कर्मपरायणानराः॥विनष्टरागादिविमत्सरानरास्तरंतिसंसार
समुद्रमश्रमं॥१०॥प्रथमेसूतवाक्यंशौनकप्रति॥नैष्कर्म्यमप्यच्युतभाववर
र्जितंनशोभतेज्ञानमलंनिरंजनं॥कुतःपुनःशश्वदभद्रमीश्वरेनचार्पितंक
र्मयदप्यकारणं॥११॥आत्मारामाश्चमुनयोनिर्ग्रंथाअप्युरुक्रमे॥कुर्वंत्यहैतुकीं
भक्तिमित्थंभूतगुणोहरिः॥१२॥षष्ठेवृत्रासुरवाक्यंदेवान्प्रति॥ननाकपृष्ठंनच
सार्वभौमंनपारमेष्ठ्यंनरसाधिपत्यं॥नयोगसिद्धिरपुनर्भवंवासमंजसत्वावि
रहय्यकांक्षे॥१३॥दशमेश्रीकृष्णउद्धवंप्रतिवाक्यं॥तस्मात्मद्भक्तियुक्तस्ययोगिनो
भविष्यति वैमदात्मनः॥नज्ञानंनचवैराग्यंप्रायःश्रेयोभवेदिह॥१४॥यत्कर्मभिर्यत्तपसाज्ञान
रहस्यमिपा नवैराग्यतश्चयेत्॥योगेनदानधर्मेणश्रेयोभिरितरैरपि॥१५॥तत्सर्वंभक्तियोगे
८२

सां त्वं धर्म उद्धव न स्वाध्यायस्तपं स्त्यागो यथा भक्ति र्ममोर्जिता: ॥६१॥ भक्त्याहमेकया ग्रा
ह्यश्श्रद्धयात्मा प्रियः सतां भक्तिः पुनाति मन्निष्ठा श्वपाकानपि संभवा ॥६२॥ धर्मः सत्य
दयोपेतो विद्या वा तपसान्विता: ॥ मद्भक्त्यापेतमात्मानं न सम्यक् प्रपुनाति हि ॥६३॥ कथं सु
बिना रोमहर्षं द्रवता चेतसा बिना ॥ बिनानंदाश्रुकलया शुध्येद्भक्त्या बिनाशयः ॥६४॥ वाग्ग ना७
द्गदा द्रवते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्वचिच्च ॥ विलज्ज उद्गायति नृत्यते च मद्भक्ति
युक्तो भुवनं पुनाति ॥६५॥ यथाग्निना हेममलं जहाति ध्मातं पुनः स्वं भजते स्वरूपं ॥ आ
त्मा च कर्मानुशयं विधूय मद्भक्ति योगेन भजत्यथो मां ॥६६॥ द्वादशे मार्कंडेयवाक्यं
श्रीभुप्रति ॥ वरमेकं वृणोथापि पूर्णात्कामाभिवर्षणात् ॥ भगवत्युत्तमां भक्तिं तत्परेषु त
था त्वयि ॥६७॥ त्वाष्टनो वाक्यं ॥ तथापरे चात्मसमाधियोगबलेन जित्वा प्रकृतिं बली
ष्ठां त्वामेव धीराः पुरुषं बिशंति तेषां श्रमस्स्यान्न तु सेवया ते ॥६८॥ दशमे ब्रह्मवाक्यं भग

प्रभवमीश्वरं ॥ नभजंत्य वजानंति ह्यात्मनिष्ठाः पतंत्यधः ॥ ९४ ॥ द्वादशेप्युक
वाक्यं परिक्षित्प्रति ॥ घोरे कलियुगे प्राप्ते सर्वधर्मविवर्जिताः वासुदेवपराम
र्त्यास्ते कृतार्था न संशयः ॥ ९५ ॥ एकादशे पिंगलावाक्यं ॥ संसारकूपे पतितं
विषयैर्मुषितेक्षणं ॥ ग्रस्तं कालाहिनात्मानं कोन्यस्त्रातुमधीश्वरः ॥ ९६ ॥ एका
दशे श्रीभगवद्वाक्यं उद्धवं प्रति ॥ बाध्यमानोपि मद्भक्तो विषयैरजितेंद्रियः प्रा
यः प्रगल्भया भक्त्या विषयैर्नाभिभूयते ॥ ९७ ॥ एकादशे पुरूरवावाक्यं ॥ पुंश्चल्याप
४ हृतं चित्तं को न्वन्यो मोचितुं प्रभुः ॥ आत्मारामेश्वरमृते भगवंतमधोक्षजं ॥ ९८ ॥ एका
दशे श्रीभगवद्वाक्यं उद्धवं प्रति ॥ भक्त्योद्धवानपायिन्या सर्वलोकमहेश्वरं ॥ सर्वोत्प
त्त्यप्ययं ब्रह्म कारणं मोपयाति सः ॥ ९९ ॥ यथाग्निः सुसमृद्धार्चिः करोत्येधांसि भ
स्मसात् ॥ तथा मद्विषया भक्तिरुद्धवैनांसि कृत्स्नशः ॥ १०० ॥ न साधयति मां योगो न

६

मुक्तिदात ॥६६॥ नायं सुखापो भगवान् देहिनां गोपिकासुतः ॥ ज्ञानिनां चात्मभूता
नां यथा भक्तिमतामिह ॥६७॥ दशमे ब्रह्मस्तुति श्रेयःसृतिं भक्तिमुदस्य ते विभो क्लिश्यं
ति ये केवलबोधलब्धये तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघा
तिनां ॥६८॥ पुरेह भूमन् बहवोपि योगिनस्त्वदर्पितेहा निजकर्मलब्धया ॥ विबु
ध्य भक्त्यैव कथोपनीतया प्रपेदिरेंजोच्युत ते गतिं परां ॥६९॥ दशमे उद्धववाक्यं नंदप्र
ति ॥ तस्मिन् भवंतावखिलात्महेतौ नारायणे कारणमर्त्यमूर्तौ ॥ भावं विधत्तां नितरां
महात्मन् किं वावशिष्टं युवयोः सुकृत्यं ॥७०॥ दानव्रततपोहोमजपस्वाध्यायसंयमैः
श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते ॥७१॥ दशमे उद्धववाक्यं गोपीप्रति ॥
क्वेमाः स्त्रि ॥ ये वनचरीर्व्यभिचारदुष्टाः कृष्णे क्व चैष परमात्मनि रूढभावः नन्वी
श्वरोनुभजतोविदुषोपि साक्षाच्छ्रेयस्तनोत्यगदराज इवोपयुक्तः ॥७२॥ नायं श्रि

६

द्भयात्मानमृत्वीहं हरिमीश्वरं ॥ ५९ ॥ नालं द्विजत्वं देवत्वमृषीत्वं वासुरात्मजाः प्रीण
नायमुकुंदस्य न वृत्तं न बहुज्ञता: ॥ ६० ॥ न दानं न तपो नेज्या न शौचं न व्रतानि च
॥ प्रीयतेमलया भक्त्या हरिरन्यद्विडंबनं ॥ ६१ ॥ मन्ये धनाभिजनरूपतपःश्रुतौजः
तेजः प्रभावबलपौरुषबुद्धियोगाः ॥ नाराधनाय हि भवंति परस्य पुंसो भक्त्या तुतोष भग
वान्गजयूथपाय ॥ ६२ ॥ अष्टमे प्रल्हादवामनं प्रतिवाक्यं ॥ चित्रं तवेहितमहो मित ६
योगमाया लीलाविसृष्टभुवनस्य विशारदस्य ॥ सर्वात्मनः समदृशो विषमः स्वभावो
प भक्तप्रियोर्दसि कल्पतरुस्वभावः ॥ ६३ ॥ दशमे श्रीशुकवाक्यं परिक्षितंप्रति ॥ स्वमाः
तुस्विन्नगात्राया विस्रस्तकबरस्रजः दृष्ट्वा परिश्रमं कृष्णः कृपयासीत्स्वबंधने ॥
६४ ॥ एवं संदर्शिता ह्यंग हरिणा भृत्यवश्यता ॥ स्ववशेनापि कृष्णेन यस्येदं सेश्व:
रं वशे ॥ ६५ ॥ नेमं विरंचो न भवो न श्रीरप्यंगसंश्रया प्रसादं लेभिरे गोपि यत्तत्प्राप्य वि

चतुर्थे रुद्र पार्वतीं प्रति नारायणपराः सर्वे न कुतश्चन बिभ्यति स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः ६

हमं च कुमं वनं गतो यद्धरिमाश्रयेत ॥ ६५ ॥ षष्ठे धर्मराजवाक्यं दूतान्प्रति ॥ एतावा
नेव लोकेस्मिन्पुंसां धर्मः परः स्मृतः ॥ भक्तियोगो भगवति तन्नामग्रहणादिभिः ॥ ६
६ ॥ षष्ठे वृत्रभीतानां देवानां वाक्यं ॥ अविस्मितं तं परिपूर्णकाममेवैव लाभेन समं प्र
शांतं ॥ विनोपसर्पत्यपरं हि बालिशः श्वलांगुलेनातितितर्त्ति सिंधुं ॥ ६७ ॥ चतुर्थे रु
द्रवाक्यं पार्वतीं प्रति ॥ नारायणपराः सर्वे न कुतश्चन बिभ्यति ॥ स्वर्गापवर्गनरकेष्वपि
तुल्यार्थदर्शिन ॥ ६८ ॥ सप्तमे प्रल्हादवाक्यं बालकान्प्रति ॥ वासुदेवे भगवति भक्तिमुद्व
हतां नृणां ॥ ज्ञानवैराग्यवीर्याणां नेह कश्चिद्व्यपाश्रयः ॥ ६९ ॥ मतिर्न कृष्णे परतः स्वतो
वा मिथोभिपद्येत गृहव्रतानां ॥ अदांतगोभिर्विशतां तमिस्रं पुनः पुनश्चर्वितचर्व
णानां ॥ ५० ॥ न ते विदुः स्वार्थगतिं हि विष्णुं दुराशया ये बहिरर्थमानिनः ॥ अंधा यथां
धैरुपनीयमाना वाचीशतंत्र्यामुरुदाम्नि बद्धाः ॥ ५१ ॥ विषयाविष्टचित्तानां

सप्तमे प्रल्हादवाक्यं हिर[illegible]ण्यकस्यपुं प्रति ४

विंशत्यावेशः स्फुरतः ॥ बाह्योदिगतं वस्तु व्रजन्नेष्टं किमाप्नुयात ॥५१॥ कौमार
आचरेत्प्राज्ञो धर्मान्भागवतानिह दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदं ॥५२
॥ न ह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः ॥ आत्मत्वात्सर्वभूतानां सिद्धि
त्वादिह सर्वतः ॥५४॥ कोऽतिप्रयासोऽसुरबालका हरेरुपासने स्वे हृदि छिद्रवत्सतः
॥ स्वस्यात्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः ॥५५॥ रायः
कलत्रं पशवः सुतादयो गृहा मही कुंजरकोशभूतयः ॥ सर्वेऽर्थकामाः क्षणभं
गुरायुषः कुर्वंति मर्त्यस्य कियत्प्रियं चलाः ॥५६॥ धनैर्हि पुरुषो लोको वा पुरुषं धनमे
क्वच ॥ स्ववश्यमेकं त्यजति तस्मात्किं धनतृष्णया ॥५७॥ एवं हि लोकाः क्रतुभिः कृ
ता अमी क्षयिष्णवः सातिशया न निर्मलाः ॥ तस्माददृष्टश्रुतदूषणं परं भक्त्यैकये
शं भजतात्मलब्धये ॥५८॥ तस्मादर्थाश्च कामाश्च धर्माश्च यदपाश्रयाः ॥ भजतानी

प्राय ॥ अतस्त्वमेव दर्शय पितुः प्रथमं तावत् ॥ १ ॥ तृतीये कपिलदेव मातरं प्रति वाक्यं ॥ सतां प्रसं
गान्मम वीर्यसंविदो भवंति हृत्कर्णरसायनाः कथाः तज्जोषणादाश्वपवर्गवर्त्मनि श्र
द्धा रतिर्भक्तिरनुक्रमिष्यति ॥ २ ॥ प्रथमे श्रीभगवद्वाक्यं आकाशवाणी नारदं प्रति ॥ सत्सेवर
यादीर्घया पिजाता मयि दृढा मति ॥ हित्वावद्यमिमं लोकं गंता मज्जनतामसि ॥ २ ॥ प्रथमे शौ
नक वाक्यं सूतं प्रति ॥ तुलयाम लवेनापि न स्वर्गं नापुनर्भवं ॥ भगवत्संगिसंगस्य मर्त्यानां किमु
ताशिष ॥ ३ ॥ यत्पादसंश्रयः सूत मुनयः प्रशमायनाः ॥ सद्यः पुनंत्युपस्पृष्टाः स्वर्धुन्यापो
नुसेवया ॥ ४ ॥ प्रथमे सूतवाक्यं ॥ नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया ॥ भगवत्युत्तमश्लो
के भक्तिर्भवति नैष्ठिकी ॥ ५ ॥ प्रथमे सूतवाक्यं शौनकं प्रति ॥ अहो वयं जन्मभृतोद्य हास्म
६ वृद्धानुवृत्त्यापि विलोमजाताः ॥ दौःकुल्यमाधिं विधुनोति शीघ्रं महत्तमानामभिधान
योगः ॥ ६ ॥ येषां संस्मरणात्पुंसां सद्यः शुद्ध्यंति वै गृहाः ॥ किं पुनर्दर्शनस्पर्शपादशौचास

नाधिभिः॥७॥ तृतीये विदुरवाक्यं मैत्रेयं प्रति॥ दुरापा ह्यल्पतपसः सेवा वैकुंठवर्त्मसु॥ यत्रो
पगीयते नित्यं देवदेवो जनार्दनः॥८॥ तृतीये कपिल देवहूति प्रति वाक्यं॥ सत्सेवया भगवा
तः कूटस्थस्य मधुद्विषः॥ रतिरासो भवेत्तीव्रः पादयोर्व्यसनार्दनः॥९॥ प्रसंगमजरं पाशमात्म
नः कवयो विदुः स एव साधुषु कृतो मोक्षद्वारमपावृतं॥१०॥ तितिक्षवः कारुणिकाः सुहृदः
सर्वदेहिनां॥ अजातशत्रवः शांताः साधवः साधुभूषणाः॥११॥ मय्यनन्येन भावेन भक्तिं कुर्वं न५
ति ये दृढां॥ मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबांधवाः॥१२॥ मदाश्रयाः कथा मृष्टाः शृण्वंति
कथयंति च॥ तपंति विविधास्तापा नैतान्मद्गतचेतसः॥१३॥ त एते साधवः साध्वि सर्वसंग
पि२ विवर्जिताः॥ संगस्तेष्वथ ते प्रार्थ्यः संगदोषहरा हि ते॥१४॥ चतुर्थे ध्रुववाक्यं भगवंतं प्रति॥
भक्तिं मुहुः प्रवहतां त्वयि मे प्रसंगो भूयादनंत महतामलमाशयानां॥ येनांजसोल्बणमुरु
व्यसनं भवाब्धिं नेष्ये भवद्गुणकथामृतपानमत्तः॥१५॥ तेन स्मरंत्यतितरां प्रियमीश मर्त्यं ये

चान्वदःसूतमहृद्हृद्वित ॥ दाराःपेत्वज्जनामभवदीयपादारविंदसौगंध्यलुब्धहृदयेषुकृत
प्रसंगाः ॥ १६ ॥ चैर्थेपृथुवाक्यंसनत्कुमारंप्रति ॥ तेषामहंपादसरोजरेणुमार्यावहेमाधिकिरी
टमायुः ॥ नित्यंयदाविभ्रतआशुपापंनश्यत्यमुंसर्वगुणाभजंति ॥ १७ ॥ चतुर्थेसनत्कुमारवा
क्यंपृथुंप्रति ॥ संगमःखलुसाधूनामुभयेषांचसंमतः ॥ यत्संभाषणसंप्रश्नःसर्वेषांवितनो
तिशं ॥ १८ ॥ चतुर्थेप्रचेतसप्रतिरुद्रोपदेशं ॥ अपानघांघ्रेस्तवकीर्तितीर्थयोरंतर्बहिःस्नानवि
धूतपाप्मनां ॥ भूतेष्वनुक्रोशसुसत्वशीलिनांस्यात्संगमोनुग्रहएषनस्तव ॥ १९ ॥ चतुर्थेप्रचेत
सवाक्यंरुद्रंप्रति ॥ यत्रेड्यंतेकथामृष्टास्तृष्णायाःप्रशमोयतः ॥ निर्वैरःसर्वभूतेषुनोद्वेगोयत्रक
कश्चनः ॥ २० ॥ यत्रनारायणःसाक्षात्न्यासीनांपरमांगतिः ॥ प्रस्तूयतेसत्कथासुमुक्तसंगैःपुनःपु
नः ॥ २१ ॥ तेषांविचरतांपद्भ्यांतीर्थानांपावनेच्छया ॥ भीतस्यकिंनरोचेतत्तावकानांसमागमः ॥ २
२ ॥ पंचमेऋषभदेववाक्यं ॥ महत्सेवांद्वारमाहुर्विमुक्तेस्तमोद्वारंयोषितांसंगिसंगं ॥ महांतस्ते

समचित्ताः प्रशांता विमन्यवः सुहृदः साधवो ये ॥२३॥ ये वा मयीशे कृतसौहृदार्था जनेषु देहंभरवा
र्त्तिकेषु ॥ गृहेषु जायात्मजरातिमत्सु न प्रीतियुक्ता यावदर्थाश्च लोके ॥२४॥ गुरुर्न स स्यात्स्व
जनो न स स्यात् पिता न स स्यात् जननी न स स्यात् ॥ दैवं न स स्यान्न पतिश्च स स्यान्न मोचयेद्यः
समुपेतमृत्युं ॥२५॥ सप्तमे प्रह्लादवाक्यं ऋषभदेव प्रति ॥ मागारदारात्मजवित्तबंधुषु संगो
यदि स्याद्भगवत्प्रियेषु नः ॥ यः प्राणवृत्त्या परितुष्ट आत्मवान् सिद्ध्यत्यदूरान्न तथेंद्रि
यप्रियः ॥२६॥ पंचमे रहूगणवाक्यं जडभरथं प्रति ॥ अहो न जन्माखिलजन्मशोभनं किं
मु जन्मभिस्त्वपरैरप्यमुष्मिन् ॥ न यत् हृषीकेशयशः कृतात्मनो महात्मनो वः प्रचुर
समागम ॥२७॥ न ह्यद्भुतं त्वच्चरणाब्जरेणुभिर्हतांहसो भक्तिरधोक्षजे मलाः ॥ मुहू
र्तिकाद्यस्य समागमाच्च मे दुस्तर्कमूलोपहतोस्मि विवेकः ॥२८॥ पंचमे जडभरथवाक्यं रहू
गणं प्रति ॥ रहूगणैतत्तपसा न याति न चेज्यया निर्वपणाद्गृहाद्वा ॥ न छंदसा नैव जलाग्नि सू

स्पृष्टैर्विनामहृन्माद्दरजोभिषेकं ॥ २९ ॥ नैषामतिस्तावदुरुक्रमांघ्रिं स्पर्शत्यनर्थापग
मोयदर्थः ॥ महीयसांपादरजोभिषेकं निष्किंचनानां नवृणीतयावत् ॥ ३० ॥ सप्तमे प्रह्ला
दवाक्यं श्रीनृसिंहं प्रति ॥ तस्मादमूस्तनुभृतामहमाशिषो ज्ञः आयुः श्रियं विभवमैंद्रियमा
विरिंच्यात् ॥ नेच्छामि ते विलुलितानुरुविक्रमेण कीलात्मनोपनय मां निजभृत्यपार्श्वे ॥ ३१ ॥
एवं जनं निपतितं प्रभवाहिकूपे कामाभिकाममनु यः प्रतपन्प्रसंगात् ॥ कृत्वात्मसात्सु
रर्षिणा भगवन्गृहीतः सोहं कथं नु विसृजे तव भृत्यसेवां ॥ ३२ ॥ पंचमे प्रह्लादवाक्यं ॥ यत्सं
गलब्धं निजवीर्यवैभवं तीर्थं मुहुः संस्पृशतां हि मानसं ॥ हरत्यजोंतः श्रुतिभिर्गतोंगजं को
वै न सेवेत मुकुंदविक्रमं ॥ ३३ ॥ नवमे वैकुंठनाथ दुर्वासा प्रति वाक्यं ॥ अहं भक्तपराधीनो ह्य
स्वतंत्र इव द्विज ॥ साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः ॥ ३४ ॥ नाहमात्मानमाशासे मद्भक्तैः नसा
साधुभिर्विना ॥ श्रियं चात्यंतिकीं ब्रह्मन्येषां गतिरहं परा ॥ ३५ ॥ ये दारागारपुत्राप्तान्

प्राणान्नवित्तमिमंपरंहित्वापांशरणंयाताःकथंतात्स्त्यक्तुमुत्सहे॥३६॥मयिनिर्बद्धहृदयाः
साधवःसमदर्शनाः॥वशेकुर्वंतिमांभक्त्यासत्स्त्रियःसत्पतिंयथा॥३७॥मत्सेवयाप्रतीतंच
सालोक्यादिचतुष्टयं॥नेच्छंतिसेवयापूर्णाःकुतोन्यत्कालविप्लुतं॥३८॥साधवोहृदयंम
ह्यंसाधूनांहृदयंत्वहं॥मदन्यत्तेनजानंतिनाहंतेभ्योमनागपि॥३९॥दशमेअक्रूरप्र
तिश्रीकृष्णवाक्यं॥भवद्विधामहाभागानिषेव्याअर्हसत्तमाः॥श्रेयस्कामैर्नृभिर्नित्यं
देवाःस्वार्थानसाधवः॥४०॥दशमेमुचकुंदवाक्यंश्रीप्रति॥भवापवर्गोभ्रमतोयदाभ
वेज्जनस्यतर्ह्यच्युतसत्समागमः॥सत्संगमोयर्हितदैवसद्गतौपरावरेशेत्वयिजायते
व मति॥४१॥नह्यम्मयानितीर्थानिनदेवामृच्छिलामयाः॥तेपुनंत्युरुकालेनदर्शनादे
वसाधवः॥४२॥दशमेश्रीभगवद्वाक्यंमुचकुंदप्रति॥अहोवयंजन्मभृतोलब्धंकात्स्न्ये
नतत्फलं॥देवानामपिदुःप्राप्यंयद्योगेश्वरदर्शनं॥४३॥किंस्वल्पतपसांनृणामर्चा

देवचक्षुषां॥ दर्शनस्पर्शनप्रश्नप्रह्वपादार्चनादिकं॥ ६४॥ नाग्निर्नसूर्योनचचंद्र
तारकानभूर्जलंखंश्वसनोथवाङ्मनः॥ उपासिताभेदकृतोहरंत्यघंविपश्चितो घ्नंति
मुहूर्तसेवया॥ ६५॥ यस्यात्मबुद्धिःकुणपेत्रिधातुकेस्वधीःकलत्रादिषुभौमइज्य
धीः॥ यत्तीर्थबुद्धिःसलिलेनकर्हिचित्जनेष्वभिज्ञेषुसएवगोखरः॥ ६६॥ नवमे
भागीर्थगंगाप्रतिवाक्यं॥ साधवोन्यासिनःशांताब्रह्मिष्ठालोकपावना॥ हरंत्यघंते
गसंगात्तेष्वास्तेह्यघभिद्धरिः॥ ६७॥ एकादशेवसुदेवनारदप्रतिवाक्यं॥ भूतानांदेव
चरितंदुःखायचसुखायच॥ सुखायैवहिसाधूनांत्वादृशामच्युतात्मनां॥ ६८॥ भ
जंतिजेयथादेवान्देवाऽपितथैवतान्॥ छायेवकर्मसचिवाःसाधवोदीनवत्स
लाः॥ ६९॥ एकादशेजनकवाक्यंनवयोगेश्वरप्रति॥ दुर्लभोमानुषोदेहोदेहिनांक्षण
भंगुरः॥ तत्रापिदुर्लभंमन्येवैकुंठप्रियदर्शनः॥ ७०॥ एकादशेभगवद्वाक्यंउद्धवप्र

ति ॥ नरोधयतिमां योगो न सांख्यं धर्म एव च ॥ न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न द
क्षिणा ॥ ५१ ॥ व्रतानि यज्ञछंदांसि तीर्थानि नियमा यमाः ॥ यथावरुंधे सत्संगः सर्वसं
गापहो हि मां ॥ ५२ ॥ सत्संगेन हि दैत्या यायातुधानाः खगाः मृगाः ॥ गंधर्वाप्सरसौगाः ना
सिद्धाश्चारणगुह्यकाः ॥ ५३ ॥ विद्याधरा मनुष्येषु वैश्याः शूद्राः स्त्रियोंऽत्यजाः ॥ रजस्तमः प्र
कृतयस्तस्मिंस्तस्मिन् युगे युगे ॥ ५४ ॥ बहवो मत्पदं प्राप्तास्त्वाष्ट्रकायाधवादयः ॥ वृष
पर्वा बलिर्बाणो मयश्चाथ विभीषणः ॥ ५५ ॥ सुग्रीवो हनुमान् ऋक्षो गजो गृध्रो वणिक्
पथः ॥ व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्यस्तथापरे ॥ ५६ ॥ तेनाधीतश्रुतिगणा नोपासि
तमहत्तमाः ॥ अव्रतातप्ततपसः सत्संगान्मामुपागताः ॥ ५७ ॥ ततो दुःसंगमुत्सृज्य स
त्सु सज्जेत बुद्धिमान् ॥ संत एवास्य छिंदंति मनोव्यासंगमुक्तिभिः ॥ ५८ ॥ यद्विसङ्गी
वपि पुनः शिश्नोदरकृतोद्यमैः ॥ आस्थितो रमते जंतुस्तमो विशति पूर्ववत् ॥ ५९

॥ सत्यंशौचंदयामौनंबुद्धिःह्रीश्रीयशःक्षमाः॥ शमोदमोभगश्चेतियत्संगाद्या
तिसंक्षयं॥६०॥ तेष्वशांतेषुमूढेषुयोषित्क्रीडामृगेषुचसंगंनकुर्यात्शोच्येषुखं
डितात्मस्वसाधुषु॥६१॥ यथोपश्रयमाणस्यभगवंतंविभावसुं॥ सीतंभयंतमो
प्येतिसाधून्संसेवतस्तथा॥६२॥ निमज्ज्योन्मज्जतांघोरेभवाब्धौपरमायणं॥ सं
तोब्रह्मविदःशांतानौर्दृढेवाप्सुमज्जतां॥६३॥ श्रीभगवद्वाक्यंउद्धवंप्रति॥ अन्नंहिप्रा
णिनांप्राणआर्त्तानांशरणंत्वहं॥ धर्मोवित्तंनृणांप्रेत्यसंतोर्वाग्बिभ्यतोरणं॥६४॥ संतो
च४ दिशंतीतिचक्षूंषिबहिरर्कःसमुत्थितः॥ देवताबांधवाःसंतंसआत्माहमेवच॥६५॥ इतिश्री संताः४
मत्कृष्णोत्तमचरणारविंदकृपामकरंदबिंदुप्रोन्मीलितविवेकतैरभुक्तपरमहंस
विष्णुपुरीग्रथितायांश्रीभागवतामृताब्धिलब्धश्रीभक्तिरत्नावल्यांसत्संगवर्णे
ननामद्वितीयंविरचनं॥२॥ अथप्रथमभक्तेर्विशेषेणावतारंविरचनमारभ्यते तत्रनवविधानां

गवढ्र१

भक्तीनां प्राधान्यमभिप्रेत्यता एव दर्शयितुं प्रथमं ॥ १ ॥ सप्तमे प्रह्लादवाक्यं हिरण्यकशि
पुं प्रति ॥ श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं ॥ अर्चनं वंदनं दास्यं सख्यमात्मनिवेद
नं ॥ १ ॥ इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा क्रियेत भगवत्यद्धा तन्मन्येऽधीतमुत्तमं ॥ २
नवमे श्रीशुकवाक्यं परीक्षितं प्रति ॥ स वै मनः कृष्णपदारविंदयोर्वचांसि वैकुंठगुणानु
वर्णने ॥ करौ हरेर्मंदिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये ॥ ३ ॥ मुकुंदलिंगालय
दर्शने दृशौ तद्भृत्यगात्रस्पर्शेऽगसंगमे ॥ घ्राणं च तत्पादसरोजसौरभे श्रीमत्तुलस्या रस
५त नां तदर्पिते ॥ ४ ॥ पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिवंदने ॥ कामं च दास्ये
न तु कामकाम्यया यथोत्तमश्लोकगुणाश्रया रतिः ॥ ५ ॥ तृतीये मैत्रेयवाक्यं विदुरं प्रति ॥ श्रव
णं कीर्तनं चास्य स्मरणं महतां गतेः ॥ सेवेज्या वंदनं दास्यं सख्यमात्मनिवेदनं ॥ ६ ॥ द्विती
यशुकवाक्यं ॥ श्रुतः संकीर्तितो ध्यातः पूजितश्चादृतोऽपि वा ॥ नृणां धुनोति भगवान् हृत्स्थो

जन्मापुनात्मसुमं ॥ ७ ॥ प्रथमेकुंतीवाक्यंश्रीकृष्णंप्रति ॥ शृण्वंतिगायंतिगृणंत्यभिक्ष्णशःस्मरं
तिनंदंतितवेहितंजनाः ॥ तएवपश्यंत्यचिरेणतावकंभवप्रवाहोपरमंपदांबुजं ॥ ८ ॥ षष्ठेवृ
त्रासुरवाक्यंइंद्रंप्रति ॥ अहंहरेतवपादैकमूलदासानुदासोभवितास्मिभूयः ॥ मनःस्मरेता
सुपतेर्गुणानांगृणीतवाक्कर्मीकरोतिकायः ॥ ९ ॥ अपिबतसंक्लेशशमेविधत्तेगुणानुवाद
श्रवणंमुरारेः ॥ कुतःपुनस्तच्चरणारविंदपरागसेवारतिरात्मलब्धा ॥ १० ॥ नोत्तमश्लोकवा
र्तानांजुषतांतत्कथामृतं ॥ स्यात्संभ्रमोंतकालेपिस्मरतांतत्पदांबुजं ॥ ११ ॥ मन्वीस्तयाननुस
मेच्चितयामुकुंदश्रीमत्कथाश्रवणवर्णनचिंतयेति ॥ तद्धामदुस्त्यजकृतांतजवापवर्गंग्रामा
द्वनंक्षितिभुजोपिययुर्यदर्थाः ॥ १२ ॥ दशमेश्रीशुकवाक्यंपरीक्षितंप्रति ॥ यानीहविश्वविलयो
द्भववृत्तिहेतुकर्माण्यनंतविषयाणिहरिश्चकार ॥ यस्त्वंगगायतिशृणोत्यनुमोदतेवाभक्ति
र्भवेद्भगवतिह्यपवर्गमार्गे ॥ १३ ॥ तृतीयेसनकादिवाक्यंभगवंतंप्रति ॥ कामंभवःस्ववृजिनै

निरयेषुनस्याच्चेतोलिवद्यदिनुतेपदयोरमेत॥वाचश्चनस्तुलसिवद्यदितेंघ्रिशोभापूर्ये
ततेगुणगणैर्यदिकर्णरंध्रः॥१४॥दशमेनंदवाक्यंउद्धवंप्रति॥मनसोवृत्तयोनस्युःकृ
ष्णपादांबुजाश्रयाः॥वाचोभिधायिनीर्नाम्नांकायस्तत्प्रह्वणादिषु॥१५॥एकाद
शेभगवद्वाक्यंशौनकंप्रति॥गृणंतोशृण्वंतोवीर्याण्युद्दामानिहरेर्मुहुः॥यथासुजा
तयाभक्त्याशुध्येन्नात्माव्रतादिभिः॥१६॥यथायथात्मापरिमृज्यतेसौमत्पुण्यगाथा
श्रवणाभिधानैः॥तथातथापश्यतिवस्तुसूक्ष्मंचचक्षुर्यथैवांजनसंप्रयुक्तं॥१७॥प्रथ
मेसूतवाक्यंशौनकंप्रति॥शृण्वतःश्रद्धयानित्यंगृणतश्चविचेष्टितंकालेननातिदीर्घे
णभगवान्विशतेहृदि॥१८॥संकीर्त्यमानोभगवाननंतःश्रुतानुभावोव्यसनंहिपुं
सांप्रविश्यचित्तंविधुनोत्यशेषंयथातमोर्कोभ्रमिवातिवातः॥१९॥तृतीयेश्रीशुकवा
क्यंपरीक्षितंप्रति॥तस्माद्भारतसर्वात्माभगवान्हरिरीश्वरः॥श्रोतव्यःकीर्तितव्यश्च

स्मर्तृव्यसेकृतामयं ॥२०॥ चतुर्थे ध्रुववाक्यं भगवंतं प्रति ॥ यानिर्वृतिस्तनुभृतां तव पा
दपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् ॥ सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्किं
त्वंतकासिलुलितात्पततां विमानात् ॥२१॥ एकादशे कविजनकं प्रति वाक्यं ॥ शृण्वन्
सुभद्राणि रथांगपाणेर्जन्मानि कर्म्माणि च यानि लोके ॥ गीतानि नामानि तदर्थका
निगायन्विलज्जो विचरेदसंगः ॥२२॥ दशमे श्रीशुकवाक्यं परीक्षित्प्रति ॥ न यत्र श्रवणा
दीनि रक्षोघ्नानि स्वकर्मसु कुर्वंति सात्वतां भर्तुर्यातुधान्यश्च तत्र हि ॥२३॥ षष्ठे यमवाक्यं दू
तान्प्रति ॥ जिह्वा न वक्ति भगवद्गुणनामधेयं चेतश्च न स्मरति तच्चरणारविंदं ॥ कृष्णाय
नो नमति यच्छिर एकदापि तानानयध्वमसतोकृतविष्णुकृत्यान् ॥२४॥ द्वितीये शौन
कवाक्यं सूतं प्रति ॥ बिले वतोरुक्रमविक्रमान्ये न शृण्वतः कर्णपुटे नरस्य ॥ जिह्वासती
दार्दुरिकेव सूत न चोपगायत्युरुगायगाथाः ॥२५॥ भारः परं पट्टकिरीटजुष्टमप्युत्तमांगं

१२

ननमेन्मुकुंदं ॥ शावौकरौनोकुरुतःसपर्यांहरेर्लसत्कांचनकंकणौवा ॥ २६ ॥ वर्हायिते
तेनयनेनराणांलिंगानिविष्णोर्ननिरीक्षतोयेपादौनृणांतौद्रुमजन्मभाजौक्षेत्राणिना
नुव्रजतोहरेर्यौ ॥ २७ ॥ जीवन्छवोभागवतांघ्रिरेणुंनजातुमर्त्योभिलभेतयस्तुश्रीविष्णु
पद्यामनुजस्तुलस्याःश्वसन्छवोयस्तुनवेदगंधं ॥ २८ ॥ द्वितीयेशौनकवाक्यंसूतंप्रति ॥
मावाग्ययातस्यगुणान्गृणीतेकरौचतत्कर्मकरोतिमनश्च ॥ स्मरेद्वसंतंस्थिरजंगमेषुशृ
णोतितत्पुण्यकथाःसकर्णः ॥ २९ ॥ शिरस्तुतस्योभयलिंगमानमेत्तदेवयत्पश्यतितत्
द्धिचक्षुः ॥ अंगानिविष्णोरथतज्जनानांपादोदकंयानिभजंतिनित्यं ॥ ३० ॥ तृतीय
मैत्रेयवाक्यंविदुरंप्रति ॥ एकांतलाभंवचसोनुपुंसांसुश्लोकमौलेर्गुणवादमाहुः
॥ श्रुतेश्चविद्वद्भिरुपाकृतायांकथासुधायामुपसंप्रयोगं ॥ ३१ ॥ द्वितीयेश्रीशुक
वाक्यंपरीक्षितंप्रति ॥ तस्माद्गोविंदमाहात्म्यमानंदरससुंदरं ॥ शृणुयात्कीर्तयेन्नि

१७

त्यमसकृत्तार्थीनसंशयं ॥१२॥ इतिश्रीमत्पुरुषोत्तमचरणारविंदकृपामकरंदविंदुप्रो
न्मीलितविवेकतैलवन्नुमुक्तपरमहंसविष्णुपुरीग्रथितायांश्रीभागवतामृताब्धिलब्ध
श्रीभगवद्भक्तिरत्नावल्यांभक्तिविशेषणनामतृतीयंविरचनं ॥३॥ अथश्रवणंनिरू
पयितुंविरचनमारभ्यते ॥ प्रथमेसूतवाक्यंशौनकंप्रति ॥ शृण्वतांस्वकथांकृष्णःपुण्य
श्रवणकीर्त्तनः ॥ हृद्यंतःस्थोह्यभद्राणिविधुनोतिसुहृत्सतां ॥१॥ द्वितीयेश्रीशुकवाक्यं
परीक्षितंप्रति ॥ पिबंतियेभगवतआत्मनःसतांकथामृतंश्रवणपुटेषुसंभृतंपुनंतिते
विषयविदूषिताशयंव्रजंतितच्चरणसरोरुहांतिकं ॥२॥ धर्मःस्वनुष्ठितःपुंसांविष्वक्से
नकथासुयःनोत्पादयेद्यदिरतिंश्रमएवहिकेवलं ॥३॥ दशमेब्रह्मवाक्यंभगवंतं
प्रति ॥ ज्ञानेप्रयासमुदपास्यनमंतएवजीवंतिसन्मुखरितांभवदीयवार्त्तां ॥ स्थाने
स्थिताःश्रुतिगतांतनुवाङ्मनोभिर्येप्रायशोजितजितोप्यजितैस्त्रिलोक्यां ॥४॥ सप्तमेप्र

म

नकादिवाक्यंभगवंतंप्रति॥ नात्यंतिकंविगणयंत्यपिते प्रसादंकिंत्वन्यदर्पितभयंभ्रुव
उन्नयेस्तेयेंगत्वदंघ्रिशरणाभवतःकथायाःकीर्तन्यतीर्थयशसःकुशलारसज्ञाः॥५॥
प्रथमेसूतवाक्यंशौनकप्रति॥ कोवाभगवतस्तस्यपुण्यश्लोकेड्यकर्मणःशुद्धिकामो २
नशृणुयाद्यशःकलिमलापहं॥६॥ द्वितीयेश्रीशुकवाक्यंपरीक्षित्प्रति॥ प्रविष्टः २
कर्णरंध्रेणस्वानांभावसरोरुहं॥ धुनोतिशमलंकृष्णःसलिलस्ययथाशरित्॥७॥
एकादशेदेवानांवाक्यंभगवंतंप्रति॥ शुद्धिर्नृणांनतुतथेड्यदुराशयानांविद्याश्रुता
ध्ययनदानतपःक्रियाभिः॥ सत्वात्मनामृषभतेयशसिप्रवृद्धसच्छ्रद्धयाश्रवणसं २
भृतयायथास्यात्॥८॥ दशमेपरीक्षित्प्रति॥ निवृत्तर्षैरुपगीयमानाद्भवौषधाच्छ्रो
त्र श्रेमनोभिरामात् कउत्तमश्लोकगुणानुवादात्पुमान्विरज्येतविनापशुघ्नान् २
ते॥ प्रथमेशौनकवाक्यंसूतंप्रति॥ कोनामतृप्येद्रसवित्कथायांमहत्तमैकांतप

रायणस्य ॥ नांतं गुणानाम गुणस्य जग्मुर्योगेश्वरा ये भवपाद्ममुख्याः ॥ १० ॥ द्वितीये श्रीशु
कवाक्यं परिक्षित्प्रति ॥ ज्ञानं यदाप्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसाद उत यत्र गुणे भ
ष्वसंगः ॥ कैवल्यसंमतपथस्त्वथ भक्तियोगः को निर्वृतो हरिकथासु रतिं न कुर्यात् ॥ १
१ ॥ द्वितीये शौनकवाक्यं सूतं प्रति ॥ आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ ॥ तस्यर्ते यत
क्षणो नीत उत्तमश्लोकवार्तया ॥ १२ ॥ तरवः किं न जीवंति भस्त्राः किं न श्वसंति हि ॥ न खादं
५८ ति न मेहंति किं ग्रामे पशवोऽपरे ॥ १३ ॥ श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः ॥ न यत्कर्णप
थोपेतो जातु नाम गदाग्रजः ॥ १४ ॥ तृतीये विदुरमैत्रेयं प्रतिवाक्यं ॥ तानशौच्यशोच्यानवि
दोनुशोचे हरेः कथायां विमुखानघेन ॥ क्षिणोति देवो निमिषस्तु तेषामायुर्वृथावादग॰
तिस्मृतीनां ॥ १५ ॥ तृतीये ब्रह्मवाक्यं ॥ यन्न व्रजंत्यघभिदो रचनानुवादात्शृण्वंति ये
न्यविषयाः कुकथा मतिघ्नीः ॥ यास्तु श्रुता हतभगैर्नृभिरात्तसारास्तांस्तान्क्षिपंत्यश॰

रणोस्तुतमः सुहृत्तः ॥१६॥ तृतीये तत्वानां वाक्यं भगवंतं प्रति ॥ पानेनते देवकथामुधायाः प्रव
द्धभक्त्या विशद्धाशयाये ॥ वैराग्यसारं प्रतिलभ्य बोधं यथांजसान्वीयुरकुंठधिष्ण्यं ॥१७॥
तृतीये ब्रह्मवाक्यं भगवंतं प्रति ॥ येतुत्वदीयचरणांबुजकोशगंधं जिघ्रंति कर्णविवरैः श्रुति
वातनीतं ॥ भक्त्या गृहीतचरणः परयाचतेषां नापैषि नाथ हृदयांबुरुहात्स्वपुंसां ॥१८॥ चतुर्थे
सिद्धानां वाक्यं भगवंतं प्रति ॥ अथंत्वत्कथामृष्टपीयूषनद्यांमनोवारणःक्लेशदावाग्निदग्धः
॥ तृषार्तोवगाढो न संस्मारदावं न निःक्रामति ब्रह्मसंपन्नवन्नः ॥१९॥ चतुर्थे पृथुवाक्यं भग
वंतं प्रति ॥ वरान्विभोत्वद्वरदेश्वराद्बुधः कथं वृणीते गुणविक्रियात्मनां ॥ येनारकाणामपि
संतिदेहिनां तानीश कैवल्यपते वृणे न च ॥२०॥ तदप्यहं नाथ न कामये क्वचिन्न यत्रयुष्मच्च
रणांबुजासवः ॥ महत्तमांतर्हृदयान्मुखच्युतो विधत्स्वकर्णायुतमेषमेवरः ॥२१॥ सउत्तम
श्लोकमहन्मुखच्युतो भवत्पदांभोजसुधाकणानिलः स्मृतिःपुनर्विस्मृततत्ववर्त्मनांकुर

योगिनां नो वितरंत्यलं वैरैः ॥२२॥ दशमे युधिष्ठिरवाक्यं भगवंतं प्रति ॥ यशः शिवं सुश्रव आ
र्य संगमे यदृच्छया चोपशृणोति ते सकृत् ॥ कथं गुणज्ञो विरमेद्विना पशुं श्रीर्यत्प्रवव्रे गुण
संग्रहेच्छया ॥२३॥ चतुर्थे नारदवाक्यं भगवंतं प्रति ॥ तस्मिन्महन्मुखरिता मधुभिच्चरित्र
पीयूषशेषसरितः परितः स्रवंति ॥ ता ये पिबंत्यवितृषो नृप गाढकर्णैस्तान्न स्पृशंत्यशन
तृड्भयशोकमोहाः ॥२४॥ एते ह्युपद्रुता नित्यं जीवलोकः स्वभावजैः ॥ न करोति हरेर्नूनं क
थामृतनिधौ रतिं ॥२५॥ दशमे परिक्षितवाक्यं श्रीशुकं प्रति ॥ नैषातिदुःसहा क्षुन्मां त्यक्तो
दमपि बाधते ॥ पिबंतं त्वन्मुखांभोजच्युतं हरिकथामृतं ॥२६॥ प्रथमे परिक्षितवाक्यं शुकं प्रति ॥
तमोपयातं प्रतियंतु विप्रा गंगा च देवी धृतचित्तमीशे ॥ द्विजोपसृष्टः कुहकस्तक्षको वा दश
त्वलं गायत विष्णुगाथा ॥२७॥ प्रथमे श्रीशुकवाक्यं परिक्षितं प्रति ॥ अन्येषां पुण्यश्लोका
नामुद्दामयशसां सतां ॥ उपश्रुत्य भवेन्मोदः श्रीवत्सांकस्य किं पुनः ॥२८॥ तस्माद्धीमा

न्कृ यो पुण्यां गोविंदचरिताश्रितां महापुण्यप्रदां यस्मात्तुष्टा शृणुष्व नयसत्तमः ॥ २९ ॥ एका
दशे जनकवाक्यं नवयोगेश्वरप्रति ॥ नानुतृप्ये जुषन्युष्मद्वचो हरिकथामृतं संसार
तापनिस्तप्तो मर्त्यस्तत्तापभेषजं ॥ ३० ॥ द्वादशे शुकवाक्यं ॥ संसारसिंधुमतिदुस्तरमुत्
तितीर्षोर्नान्यः प्लवो भगवतः पुरुषोत्तमस्य ॥ लीलाकथारसनिषेवणमंतरेण पुंसो भवेद्वि
विधदुःखदवार्द्दितस्य ॥ ३१ ॥ दशमे युधिष्ठिरवाक्यं भगवंतं प्रति ॥ कुतोऽशिवं त्वच्चरणां
बुजासवं महन्मनस्तो मुखनिःसृतं क्वचित् ॥ पिबंति ये कर्णपुटैरलं प्रभो देहंभृतां देहकृ
दस्मृतिच्छिदं ॥ ३२ ॥ एकादशे देवा उचुर्भगवंतं प्रति ॥ विभ्व्यस्तवामृतकथोदवहास्त्रिलो
क्याः पादावनेजसरितः शमलानि हंतुं ॥ आनुश्रवं श्रुतिभिरंघ्रिजमंगसंगैस्तीर्थद्वयं शु
चिषदस्त उपस्पृशंति ॥ ३३ ॥ एकादशे उद्धववाक्यं भगवंतं प्रति ॥ तव विक्रीडितं ब्रह्मन्नृणां
परमं मंगलं ॥ कलौपि युष्मा[illegible] त्यजेत्[illegible]स्यहो जनः ॥ ३४ ॥ श्रीभगवद्वाक्यं ॥ वयं ति

उ

हमहायोगिन्प्रभंत:कर्मवर्त्मसुत्वहूर्तिपातरिष्यामस्ताववैर्द्दुस्तरं तम:॥३५॥ एका
दशेभगवद्वाक्यंउद्धवंप्रति:॥ तावत्कर्माणिकुर्वीतननिर्विद्येतयावता॥ मत्कथा
श्रवणादौवाश्रद्धायावन्नजायते ३६॥ प्रथमेशौनकवाक्यंसूतंप्रति॥ कामोएएषस्मिन्न
नाम्यासेघूमघूम्रात्मनांभवान्॥ आपाययेतिगोविंदपादपद्मासवंमधु॥३७॥ ततीये
विदुरंवाक्यंमित्रेयंप्रति॥ श्रुतस्यपुंसांसुचिरश्रमस्यनत्वंजसासूरिभिरीडितोर्थ:॥ तन्न
द्गुणानुश्रवणंमुकुंदपादारविंदंहृदयेषुयेषां॥३८॥ चतुर्थेमैत्रेयंवाक्यंविदुरंप्रति॥ छि
१ चौ॰ न्नान्यधीगततात्मगतिर्मिहस्तत्त्यजेच्छिन्नदिदंवपुनेनयेन॥ तावन्नयोगगतिभि
र्यतिरप्रमत्तोयावद्गदाग्रजकथासुरतिंनकुर्यात्॥३९॥ दशमेगोपीवाक्यंश्रीकृष्णप्रति॥ त
वकथामृतंतप्तजीवनंकविभिरीडितंकल्मषापहं॥ श्रवणमंगलंश्रीमदाततंभुवि
गृणंतियेभूरिदाजना॥ ४०॥ षष्ठेचित्रकेतुवाक्यंभगवंतंप्रति॥ नहिभगवन्नघटि

सं
तमिदं त्वद्दर्शनान्नृणामखिलपापक्षयः यन्नामसकृच्छ्रवणात्पुक्कसोपि विमुच्यते जः
न्मसंसारात्सांद्यात्तु ॥ ६१ ॥ तृतीये मैत्रेयवाक्यं विदुरं प्रति ॥ को नाम लोके पुरुषार्थसारवि
त्पुराकथानां भगवत्कथासुधां आपीय कर्णांजलिभिर्भवापहां अहो विरज्येत विना
नरेतरं ॥ ६२ ॥ नारदवाक्यं ॥ नूनं दैवेन निहता ये चाच्युतकथासुधां ॥ हित्वा शृण्वंत्यसत्
गाथाः पुरीषमिव विड्भुजः ॥ ६३ ॥ तृतीये श्रीशुकवाक्यं परीक्षितं प्रति ॥ यस्तूत्तमश्लोकगुणानु
वादः संगीयतेभीक्ष्णममंगलघ्नः ॥ तमेव नित्यं शृणुयादभीक्ष्णं कृष्णेमलां भक्तिमभीप्स
मानः ॥ ६४ ॥ दशमे श्रीशुकवाक्यं परीक्षितं प्रति ॥ इत्थं परस्य निजवर्त्मरिरक्षयात्तली
लातनोस्तदनुरूपविडंबनानि कर्माणि कर्मकषणानि यदूत्तमस्य शृणुयादमुष्य पदयोर
नुवृत्तिमिच्छन् ॥ ६५ ॥ इति श्रीमत्पुरुषोत्तमचरणारविंदकृपामकरंदबिंदुप्रोन्मी
लितविवेकतैरभुक्तपरमहंसविष्णुपुरीग्रथितायां श्रीभागवतामृताब्धिलब्धश्रीम

गवद्भक्तिरत्नावल्यांश्रवणनामचतुर्थविरचनं॥छ॥अथकीर्तनंनिरूपयितुंविरच
नमारभ्यते॥तत्रसर्वधर्मेषुहरिकीर्तनंश्रेष्ठमितिअभिप्रेत्याह॥१॥प्रथमेनारदवाक्यं
व्यासंप्रति॥इदंहिपुंसस्तपसःश्रुतस्यवास्विष्टस्यसूक्तस्यचबुद्धिदत्तयोः॥अविच्यु
तोऽर्थःकविभिर्निरूपितोयदुत्तमश्लोकगुणानुकीर्तनं॥१॥द्वादशेश्रीशुकवाक्यंपरिक्षि
त्प्रति॥मृषागिरस्ताह्यसतीरसत्कथानकथ्यतेयद्भगवानधोक्षजः॥तदेवसत्यंतदेवपु
ण्यंभगवद्गुणोदयं॥२॥तदेवरम्यंरुचिरंनवंनवंतदेवशश्वन्मनसोमहोत्सवं॥तदेवशो
कार्णवशोषणंनृणांयदुत्तमश्लोकयशोनुगीयते॥३॥प्रथमेनारदवाक्यंव्यासंप्रति॥आ
पन्नःसंसृतिंघोरांयन्नामविवशोगृणन्॥ततसद्योविमुच्येतयद्बिभेतिस्वयंभयं॥४॥
नयद्वचश्चित्रपदंहरेर्यशोजगत्पवित्रंप्रगृणीतकर्हिचित्तद्वायसंतीर्थमुसंतिमान
सानयत्रहंसानिरमंत्युशिक्क्षयाः॥५॥तद्वाग्विसर्गोजनताघविप्लवोयस्मिन्प्रति

तदुहैवमं
गलं

श्लोकमवद्धवत्यपि॥ नामान्यनंतस्ययशोंकितानियच्छृण्वंतिगायंतिगृणंतिसाधवः॥
६॥ ततोन्यथाकिंचनयद्विवक्षतःपृथक्दृशस्तत्कृतरूपनामभिः॥ नकर्हिचित्क्वापि
चदुःस्थितामतिर्लभेतवाताहतनौरिवास्पदं॥ ७॥ प्रथमेनारदनुमवंव्यासंप्रति॥ प्रगा
यतःस्ववीर्याणितीर्थपादप्रियश्रवाः॥ आहूतइवमेशीघ्रंदर्शनंयातिचेतसि॥ ८॥ प्रथ
मेसूतवाक्यंशौनकप्रति॥ यायाःकथाभवतेकथनीयोरुकर्मणः॥ गुणकर्माश्रयाःपुं
भिःसंसेव्यास्ताबुभूषुभिः॥ ९॥ द्वितीयेश्रीशुकवाक्यंपरीक्षित्प्रति॥ एतन्निर्विद्यमाना
नामिच्छतामकुतोभयं॥ योगिनांनृपनिर्णीतंहरेर्नामानुकीर्तनं॥ १०॥ प्रथमेनारदवाक्यं
व्यासंप्रति॥ एतद्ध्यातुरचित्तानांमात्रास्पर्शेच्छयामुहुः॥ भवसिंधुप्लवोदृष्टोहरिचर्यानुवर्ण
नं॥ ११॥ तृतीयेब्रह्मवाक्यंनारदप्रति॥ यस्यावतारगुणकर्मविडंबनानिनामानियेसुविग
मेविवशागृणंति॥ तेनैकजन्मशमलंसहसैवहित्वासंयांत्यपावृतमृतंतमजंप्रपद्ये॥ १२॥

इति विष्णुदूतवाक्यंयमदूतान्प्रति॥ अयंहिकृतनिर्वेशोजन्मकोट्यंहसामपि॥ यद्व्याजहारवि टं
वशोनामस्वस्त्ययनंहरेः॥१३॥ एतेनैवह्यघोनोस्यकृतंस्यादघनिःकृतं॥ यदानारायणा
येतिजगादचतुरक्षरं॥१४॥ स्तेनःसुरापोमित्रध्रुक्ब्रह्महागुरुतल्पगः॥ स्त्रीराजपितृ
गोहंतायेचपातकिनोपरे॥१५॥ सर्वेषामप्यघवतामिदमेवसुनिःकृतं॥ नामव्याहरणंवि
ष्णोर्यतस्तद्विषयामतिः॥१६॥ ननिःकृतैरुदितैर्ब्रह्मवादिभिस्तथाविशुद्ध्यत्यघवान्व्रतादि ३५
भिः॥ यथाहरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणोपलंभकं॥१७॥ नैकांतिकंतद्धिकृतेपि
२८ निःकृतेमनःपुनर्द्धावतिचेदसत्पथे॥ तत्कर्मनिर्हारमभीप्सितांहरेर्गुणानुवादःखलुसत्वभा
वनः॥१८॥ अथैनंमापनयतकृताशेषाघनिःकृतं॥ यदसौभगवन्नाममियमाणःसमग्र
हीत्॥१९॥ सांकेत्यंपारिहास्यंवास्तोभंहेलनमेववा॥ वैकुंठनामग्रहणमशेषाघहरंविदुः
॥२०॥ पतितस्खलितोभग्नःसंदष्टस्तप्तआहतः॥ हरिरित्यवशेनाहपुमान्नार्हतियातनां

२३ पतितः स्खलितो चार्त्तः क्षुत्वा वा विवशो गृणन्। हरये नम इत्युच्चैर्मुच्यते सर्वपातकैः १

॥२१॥ गुरूणां च लघूनां च गुरूणि च लघूनि च॥ प्रायश्चित्तानि पापानां ज्ञात्वोक्तानि मह
र्षिभिः॥२२॥ तैस्तान्यघानि पूयंते तपोदानजपादिभिः। नाधर्मजं तद्धृदयं तदपीशांघ्रिसे
वया॥२३॥ अज्ञानादथवा ज्ञानादुत्तमश्लोकनाम यत्॥ संकीर्त्तितमघं पुंसो दहेदेधो यथा
नलः॥२४॥ यथागदं वीर्यतममुपयुक्तं यदृच्छया। अज्ञानतोप्यात्मगुणं कुर्यात्तन्मंत्रोप्युदा
हृतः॥२५॥ षष्ठे श्रीशुकवाक्यं परिक्षित्प्रति॥ एवं स विप्लावितसर्वधर्मा दास्याः पतिः पति
नि२ तो गर्ह्यकर्मणा॥ निपात्यमानो निरये हतव्रतः सद्यो विमुक्तो भगवन्नाम गृह्णन्॥२६॥ नातः
परं कर्मनिबंधकृंतनं मुमुक्षतां तीर्थपदानुकीर्त्तनात्॥ न यत्पुनः कर्मसु सज्जते मनो र
रजस्तमोभ्यां कलिलं ततोन्यथा॥२७॥ षष्ठे यमवाक्यं दूतान्प्रति॥ म्रियमाणो हरेर्नाम गृ
णन् पुत्रोपचारितं॥ अजामिलोप्यगाद्धाम किमुत श्रद्धया गृणन्॥२८॥ स्वयंभूर्नारदः शं
भुः कुमारः कपिलो मनुः प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयं॥२९॥ नामी द्वादश

२३

सं२

महात्म्यंहरेःपश्यतपुत्रकाः अजामिलोपियेनैवमृत्युपाशान्मुच्यते ॥ ३० ॥ एतावतालम ना१
घनिर्हरणायपुंसांकीर्तनंभगवतोगुणकर्मनाम्नांविक्रुश्यपुत्रमघवान्यदजामिलो॰
पिनारायणेतिम्रियमाणमुपेतिमुक्तिं ॥ ३१ ॥ प्रायेणवेदतदिदंनमहाजनोयंदेव्याविमो
हितमतिर्वतमाययालं ॥ त्रय्यांजडीकृतमतिर्मधुपुष्पितायांवैतानिकेमहतिकर्मणियु॰
ज्यमानः ॥ ३२ ॥ एवंविमृश्यसुधियोभगवत्यनंतेसर्वात्मनाविदधतेखलुभावयोगं ॥ ॰
तेमेनदंडमर्हंत्यथयद्यमीषांस्यात्पातकंतदपिहंत्युरुगायवादः ॥ ३३ ॥ षष्ठेऽजामिल गठ
म४ वाक्यं ॥ अथापिमेदुर्भगस्यविबुधोत्तमदर्शने ॥ भवितव्यंमंगलेनयेनात्मामेप्रसीदति रा४
ना१ ॥ ३४ ॥ अन्यथाम्रियमाणस्यनाशुचेर्वृषलीपतेः ॥ वैकुंठनामग्रहणंजिह्वावक्तुमिहार्हति॰
॥ ३५ ॥ क्वचाहंकितवःपापोब्रह्मघ्नोनिरपत्रपः ॥ क्वचनारायणेत्येतद्भगवन्नाममंगलं ॥ ३
६ ॥ इतिषष्ठेश्रीशुकवाक्यंपरीक्षितंप्रति ॥ ब्रह्महापितृहागोघ्नोमातृहाचार्यहाघवान् ॥ स्वे

दः पुष्कसको वापि शुद्ध्येर स्यस्य कीर्त्तनात् ॥ ३७ ॥ ततीये देवहूतीवाक्यं गोपिन्द्रति
॥ अहो बत श्वपचोतो गरीयान् यस्य जिह्वाग्रे वर्त्तते नाम तुभ्यं। ते पुस्तपस्ते जुहुवुः सस्नु
रार्या ब्रह्मानूचुर्नाम गृणंति ये ते ॥ ३८ ॥ एकादशे श्रीभगवद्वाक्यं उद्धवं प्रति ॥ ग
हेष्वाविशतां वापि पुंसां कुशलकर्मणां मद्वार्त्तायातयामानां न बंधाय गृहा मताः
॥ ३९ ॥ सप्तमे प्रह्लादवाक्यं श्रीनृसिंहं प्रति। तस्मादहं विगतविक्लव ईश्वरस्य सर्व
५ त्मनामहि गृणामि यथामनीषं ॥ नीचोपयाप गुणविसर्गमनुप्रविष्टः पूयेत येन न
हि मानमनुवर्णितेन ॥ ४० ॥ सोहं प्रियस्य सुहृदः परदेवताया लीलाकथास्तव नृ
सिंह विरंच्यगीताः अंजस्तितर्म्यनुगृणन् गुणविप्रयुक्तो दुर्गाणि ते पदयुगालयहंस
संगः ॥ ४१ ॥ अष्टमे शुक्राचार्यवाक्यं श्रीवामनं प्रति ॥ मंत्रतस्तंत्रतश्छिद्रं देशकाला
र्हवस्तुतः ॥ सर्वं करोति निश्छिद्रं नाम संकीर्त्तनं तव ॥ ४२ ॥ दशमे नारदवाक्यं ॥ या

दोहनेवहननेमथनोपलेपप्रेंखोलनार्भरुदितोक्षणमार्ज्जनादौगायंतिचैनमनुरक्त
धियोश्रुकंठ्योधन्याव्रजस्त्रियउरुक्रमचित्तयानाः ॥ ७५ ॥ दशमे गोपीवाक्यं बृहद्वंप्र
ति ॥ कथंत्यजेमहितत्संत्युक्तमुत्तमश्लोकसंविदं ॥ श्रुतिनिकृत्तोपियस्यश्रीरंगान्नच्यवतेक्वचि
त ॥ ७६ ॥ दशमे बृहद्वं वाक्यंश्रीकृष्णप्रति ॥ गायंतितेविशदकर्मगृहेषुदेव्योराज्ञां
स्वशत्रुवधमात्मविमोक्षणंच ॥ गोप्यश्चकुंजरपतेर्जनकात्मजायाःपित्रोश्चलब्ध
शरणामुनयोवयंच ॥ ७७ ॥ सप्तमे श्रीशुकवाक्यंपरीक्षित्प्रति ॥ जिह्वांलब्ध्वापियोवि
ष्णुंकीर्तनीयंनकीर्तयेत ॥ लब्ध्वापिमोक्षनिःश्रेणींसनारोहतिदुर्मति ॥ ७८ ॥ ए
कं कादशे श्रीभगवद्वाउद्धवंप्रति ॥ गांदुग्धदोहामसतींचभार्यांदेहंपराधीनमसत्प्रजां
च ॥ वित्तंत्वतीर्थीकृतमंगवाचंहीनांमयारक्षतिदुःखदुःखी ॥ ७९ ॥ यस्यांनमेपावन
मंगकर्मस्थित्युद्भवप्राणनिरोधमस्य ॥ लीलावतारेप्सितजन्मवास्याद्वंध्यांगिरंतां

विभयान्नधीरः ॥ ४८ ॥ एकादशे करभाजनवाक्यं जनकं प्रति ॥ कलिं सभाजयंत्यार
र्या गुणज्ञाः सारभागिनः कीर्तनेनैव कृष्णस्य सर्वस्वार्थोभिलभ्यते ॥ ४९ ॥ न ह्यतः पर
मो लाभो देहिनां भ्राम्यतामिह ॥ यतो विंदेत परमां शांतिं नश्यति संसृतिः ॥ ५ ॥ द्वादशे
श्रीशुकवाक्यं परिक्षितं प्रति ॥ तेषु भाग्यामनुष्येषु कृतार्थीन्यपि निश्चितं ॥ स्मरंति स्
मारयंतीये हरेर्नाम कलौ युगे ॥ ५१ ॥ कलेर्दोषनिधे राजन्नस्ति ह्येको महान्गुणः ॥
कीर्तनादेव कृष्णस्य मुक्तसंगः परं व्रजेत् ॥ ५२ ॥ कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो म
खैः ॥ द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात् ॥ ५३ ॥ द्वितीये ब्राह्मवाक्यं नारदं प्रति ॥ वि
ष्णोर्नु वीर्यगणनां कतमोर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि चस्कंभ यः स्वरंहः
सास्खलितात्रिपृष्ठं यस्मात्त्रिसाम्यसदनादुरुकंपयानं ॥ ५४ ॥ नांतं विदाम्यहममी मुन
योग्रजास्ते मायावलस्य पुरुषस्य कुतोपरे ये ॥ गायन गुणान्दशशतानन आदिदेवः

३९

श्रोत्रेघुनाथिसमवरुत्स्यतिनास्यपारं ॥५५॥ एकादशेद्रुमिलवाक्यंजनकंप्रति ॥ योवा
अनंतस्यौगुणाननंताननुक्रमिष्यतस्सतुवालबुद्धिः ॥ रजांसिभूमेर्गणयेन्कथंचि
त्कालेननैवाखिलसत्वधाम्नः ॥५६॥ दशमेअक्रूरवाक्यंभगवंतंप्रति ॥ यस्याखि
लामीवहभिःसुमंगलैर्वाचोविमिश्रागुणजन्मकर्मभिः प्राणांतिशुंभंतिपुनंतिवैजग
त्यास्ताद्विरक्ताःशवशोभनामताः ॥५७॥ दशमेश्रीशुकवाक्यंपरीक्षितंप्रति ॥ इत्थंहरेर्भग
वतोरुचिरावतारवीर्याणिवाल्यचरितानिचशंतमानि ॥ अन्यत्रचेहचश्रुतानिगृणन्म
नुष्योभक्तिंपरांपरमहंसगतौलभेत ॥५८॥ इतिश्रीमत्पुरुषोत्तमचरणारविंदकृ
पामकरंदविंदुश्रोन्मीलितविवेकतैरभुक्तपरमहंसश्रीविष्णुपुरीग्रथितायां
श्रीभागवतामृताब्धिलब्धश्रीभगवद्भक्तिरत्नावल्यांश्रीहरिकीर्तननामपंच
मंविरंचनं ॥५॥ अथस्मरणंनिरूपयितुंविरंचनमारभते ॥ तत्रभगवद्भक्तिस्मरणं

श्रीलाः कृतार्था इति ॥ १ ॥ दशमे उद्धवं वाक्यं गोपी प्रति ॥ अहो यूयं स्म पूर्णार्था भ
वन्त्यो लोकपूजिताः ॥ वासुदेवे भगवति यासामित्यर्पितं मनः ॥ १ ॥ एकादशे श्रीभ
३ गवद्वाक्यं उद्धवं प्रति ॥ एतावान् योग आदिष्टो मच्छिष्यैः सनकादिभिः ॥ सर्वतो मन
आकृष्य मय्यद्धावेश्यते यथा ॥ २ ॥ षष्ठे श्रीशुकवाक्यं परिक्षितं प्रति ॥ सकृन्मनः कृ
ष्णपदारविन्दयोर्निवेशितं तद्गुणरागि यैरिह ॥ न ते यमं पाशभृतश्च तद्भटान् स्व
प्नेपि पश्यन्ति हि चीर्णनिःष्कृताः ॥ ३ ॥ द्वितीये ब्रह्मवाक्यं नारदं प्रति ॥ न भारती मेंग मृ
षोपलक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः ॥ न मे हृषीकाणि पतन्त्यसत्पथे यन्मे
२ हृदौत्कंठ्यवता धृतो हरिः ॥ ४ ॥ द्वितीये श्रीशुकवाक्यं परिक्षितं प्रति ॥ एतावान् सां
ख्ययोगाभ्यां स्वधर्मपरिनिष्ठया ॥ जन्मलाभः परः पुंसामंते नारायणस्मृतिः ॥ ५ ॥ द्वा
दशे श्रीशुकवाक्यं परिक्षितं प्रति ॥ म्रियमाणैरभिध्येयो भगवान् परमेश्वरः ॥

तस्मात्सर्वात्मना राजन् हृदिस्थं कुरु केशवं म्रियमाणो ह्यवहितः ततो याति परां गतिम् २ २६

आत्मभावं नयंत्यंग स सर्वात्मा सर्वदर्शिनः ॥ ६ ॥ तस्मात्सर्वात्मना राजन् हृदिस्थं कुरु
केशवे ॥ म्रियमाणो ह्यवहितस्ततो याति परां गतिं ॥ ७ ॥ प्रथमे सूतवाक्यं शौनकं प्रति
॥ अविस्मृतिः कृष्णपदारविंदयोः क्षिणोत्यभद्राणि च शंतनोति सत्वस्य शुद्धिं परमा
त्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तं ॥ ८ ॥ द्वादशे श्रीशुकवाक्यं परीक्षितं प्रति ॥ विद्या
तपःप्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजाप्यैः ॥ नात्यंतशुद्धिं लभतेंतरात्मा यथा
हृदिस्थे भगवत्यनंते ॥ ९ ॥ पुंसां कलिकृतान् दोषान् द्रव्यदेशात्मसंभवान् ॥ सर्वान्
हरति चित्तस्थो भगवान्पुरुषोत्तमः ॥ १० ॥ यथा हेम्नि स्थितो वन्हिर्दुर्वर्णं हंति धातुजं
॥ एवमात्मगतो विष्णुर्योगिनामशुभाशयं ॥ ११ ॥ तृतीये उद्धववाक्यं विदुरं प्रति ॥ मन्ये सु
रान् भगवतोस्त्र्यधीशे संरंभमार्गाभिनिविष्टचित्तान् ये संयुगे चक्षत तार्क्ष्यपुत्रमंशे सु
नाभायुधमापतंतं ॥ १२ ॥ चतुर्थे पृथुवाक्यं भगवंतं प्रति ॥ भजंत्यथ त्वामत एव साधवो

व्युदस्तमायागुणविभ्रमोदयं॥ भवत्पदांभोजस्मरणादृते सतां निमित्तमन्यद्भगवन्नविद्महे
॥२३॥ तृतीये जयविजयवाक्यं वैकुंठनाथं प्रति॥ भूयादघोनि भगवद्भिरकारि दंडो योऽ
नौ हरेत सुरहेलनमप्यशेषं मा वोनुतापकलया भगवत्स्मृतिघ्नो मोहो भवेदिह तु नौ व्रजतो
रधोधः॥२४॥ दशमे राज्ञां वाक्यं श्रीकृष्णं प्रति॥ तन्नः समादिशोपायं येन ते चरणाब्जयोः
॥स्मृतिर्यथा न विरमेदपि संसरतामिह॥२५॥ एकादशे श्रीशुकवाक्यं परीक्षितं प्रति॥ शय्या
यासनाटनालापक्रीडास्नानाशनादिषु॥ न विदुः संतमात्मानं वृष्णयः कृष्णचेतसः॥२
६॥ एकादशे उद्धवं प्रति श्रीभगवद्वाक्यं॥ अकिंचनस्य दांतस्य शांतस्य समचेतसः॥ मया सं
तुष्टमनसः सर्वाः सुखमया दिशः॥२७॥ न पारमेष्ठ्यं न महेंद्रधिष्ण्यं न सार्वभौमं न रसाधिप
त्यं॥ न योगसिद्धीरपुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनान्यत्॥२८॥ मय्यर्पितात्
मनः [illegible] सभ्या निरपेक्षस्य सर्वतः॥ मयात्मना सुखं यत्तत्कुतः स्याद्विषयात्मनां॥२९

एकादशे उद्धववाक्यं भगवंतं प्रति ॥ वैरेण यं नृपतयः शिशुपालपौंड्रशाल्वादयो गति२
विलासविलोकनाद्यैः ॥ ध्यायंत आकृतिधियः शयनासनादौ तत्साम्यमापुरनुरक्तधि
यां पुनः किं ॥ २० ॥ दशमे वेदस्तुति ॥ निभृतमरुन्मनोक्षदृढयोगयुजो हृदि यन् ॥ मु
नय उपासते तदरयोपि ययुः स्मरणात् ॥ स्त्रिय उरगेंद्रभोगभुजदंडविषक्तधियो ॥
वयमपि ते समाः समदृशोंघ्रिसरोजसुधा ॥ २१ ॥ दशमे नारदवाक्यं युधिष्ठिरं प्रति ॥
एनः पूर्वकृतं यत्तद्राजानः कृष्णवैरिणः ॥ जहुस्ते च तदात्मानः कीटः पेशस्कृतो यथा
॥ २२ ॥ एकादशे भगवद्वाक्यं उद्धवं प्रति दृष्टांत ॥ विषयान्ध्यायतश्चित्तं विषयेषु२
विषज्जते ॥ मामनुस्मरतश्चित्तं मय्येव प्रविलीयते ॥ २३ ॥ दशमे नारदवाक्यं भगवं२
तं प्रति ॥ दृष्टं तवांघ्रियुगलं जनतापवर्गं ब्रह्मादिभिर्हृदि विचिंत्यमगाधबोधैः ॥२
संसारकूपपतितोत्तरणावलंबं ध्यायंश्चराम्यनुगृहाण यथा स्मृतिः स्यात् ॥ २४ ॥ द२

स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित् सर्वे विधिनिषेधाः स्युरेतयोरेव किंकराः १

श्रीमद्गोपीवाक्यं भगवंतं प्रति ॥ आहुश्च ते नलिननाभ पदारविंदं योगेश्वरैर्हृदि विचिंत्य
मगाधबोधैः ॥ संसारकूपपतितोत्तरणावलंबं गेहं जुषामपि मनस्युदियात्सदा नः ॥ २
२५ ॥ एकादशे भगवदुद्धववाक्यं कृष्णं प्रति ॥ तस्मादसदभिध्यानं यथा स्वप्नमनोरथं ॥ हि
त्वा मयि समाधत्स्व मनो मद्भावभावितं ॥ २६ ॥ इति श्रीमत्सुकृष्णोत्तमचरणारविंदद्व
पामरंदविंदुप्रोन्मीलत्तविवेकतैरमुकुपरमहंसविष्णुपुरीग्रथितायां श्रीभागवता
ब्धिलब्धश्रीमद्भागवतकीर्तिरत्नावल्यां स्मरणं नाम षष्ठविरचनं ॥ ६ ॥ अथ पादसेवनं
निरूपयितुं विरचनमारभ्यते ॥ तत्र पादसेवनं नाम परिचर्या प्रतिमादौ तत्र सर्वोप
कारकं भगवत्प्रसादसेवनमिति ॥ १ ॥ सप्तमे प्रल्हादवाक्यं बालकान्प्रति ॥ देवोसुरो मनुष्यो
वा यक्षो गंधर्व एव च ॥ भजन्मुकुंदचरणं स्वस्तिमान्स्याद्यथा वयं ॥ २ ॥ पंचमे लक्ष्मीवा
क्यं भगवंतं प्रति ॥ मत्प्राप्तये जेशसुरादयः प्रभो तप्यंत उग्रं तप ऐंद्रियेधियः ॥ अतो भगव

त्वाद्वपरायणान्नमोविंदंत्यहंत्वद्दत्तयाजितोजितः ॥२॥ दशमेगर्भस्तुति ॥ त्वय्यंबुजाक्षाखि
लसत्वधाम्निसमाधिनावेशितचेतसैकेत्वत्पादपोतेनमहत्कृतेनकुर्वंतिगोवत्सपदंभ
वाब्धिं ॥३॥ दशमेब्रह्मावाक्यंभगवंतंप्रति ॥ अथापितेदेवपदांबुजद्वयप्रसादलेशानुग्र
हीतएवहि ॥ जानातितत्वंभगवन्महिम्नोनचान्यएकोपिचिरंविचिन्वन् ॥४॥ दशमे
देवकीवाक्यंभगवंतंप्रति ॥ मर्त्योमृत्युव्यालभीतःपलायनलोकान्सर्वान्निर्भयंनाध्य
गच्छन् ॥ त्वत्पादाब्जंप्राप्ययदृच्छयाद्यस्वस्थःशेतेमृत्युरस्मादपैति ॥५॥ सप्तमेप्रह्ला
दवाक्यंभगवंतंप्रति ॥ तस्माद्रजोरागविषादमन्युमानस्पृहाभयदैन्याधिमूलं ॥ हित्वा
गृहंसंसृतिचक्रवालंनृसिंहपादंभजताकुतोभयं ॥६॥ एकादशेउद्धववाक्यंश्रीकृष्णप्र
ति ॥ अथातआनंददुघंपदांबुजंहंसाःश्रयेरन्नरविंदलोचनंसुखंनुविश्वेश्वरयोगक
र्मभिस्त्वन्माययामीविहतानमानिनः ॥७॥ चतुर्थेसनत्कुमारवाक्यंपृथुंप्रति ॥ कृच्छ्रोम

ह्यानिहमवार्णवमप्लवेशंषड्दुर्गनक्रमसुखेनतितीर्षयंति ॥ तत्वंहरेर्भगवतोभजनीयमं॰
घ्रिंकृत्वोडुपंव्यसनमुत्तरदुस्तरार्णौ ॥ ८ ॥ चतुर्थेप्रचेतसप्रतिरुद्रवाक्यं ॥ कस्त्वत्पदाब्जं
विजहातिपंडितोयस्तेवमानव्ययमानकेतनः ॥ विशंकयास्मद्गुरुरर्चतिस्मयद्विनोपप
त्तिंमनवश्चतुर्दशः ॥ ९ ॥ चतुर्थेपृथुवावाक्यंभगवंतंप्रति ॥ यत्पादसेवाभिरुचिस्तपस्वि
नामशेषजन्मोपचितंमलंधियः ॥ सद्यःक्षिणोत्यन्वहमेधतीसतीयथापदांगुष्ठविनिः
सृतासरित् ॥ १० ॥ विनिर्धुताशेषमनोमलःपुमानसंगविज्ञानविशेषवीर्यवान् ॥ यदंघ्रि
कैतव मूलेकृतकेतनःपुनर्नसंसृतिंक्लेशवहांप्रपद्यते ॥ ११ ॥ षष्ठेश्रीशुकवाक्यंपरिक्षित्प्रति ॥ ॰
कृष्णांघ्रिपद्ममधुलिट्नपुनर्विसृष्टमायागुणेषुरमतेवृजिनावहेषु ॥ अन्यस्तुका॰
महतआत्मरजःप्रमाष्टुंमीहेतकर्मयतएवरजःपुनःस्यात् ॥ १२ ॥ दशमेब्रह्मावाक्यं
भगवंतंप्रति ॥ तदस्तुमेनाथसभूरिभागोभवेत्रवान्यत्रतुवातिरश्चां ॥ येनाहमेको॰

रा

पिभवज्जनानांभूत्वानिषेवेतवपादपल्लवं॥१३॥दशमेश्रीशुकवाक्यंपरिक्षित
ति॥समाश्रितायेपदपल्लवंमहत्पदंपुण्ययसोमुरारेभवांबुधिर्वत्सपदंपरंपदं
पदंपदंयद्विपदांनतेषां॥१४॥दशमेमुचकुंदवाक्यंभगवंतंप्रति॥लब्ध्वाजनोदु
र्लभमत्रमानुषंकथंचिदव्यंगमयत्नतोनघपादारविंदंनभजत्यसन्मतिर्गृहांध
कूपेपतितोयथापशुः॥१५॥सप्तमेप्रल्हादवाक्यंश्रीनृसिंहप्रति॥विप्राद्विषड्गुणयु
तादरविंदनाभपादारविंदविमुखात्श्वपचंवरिष्ठं॥मन्येतदर्पितमनोवचनेहि
तार्थप्राणंपुनातिसकुलंनतुभूरिमानः॥१६॥षष्टेयमवाक्यंदूतान्प्रति॥तानान
यध्वमसतोविमुखान्मुकुंदपादारविंदमकरंदरसादजस्रं॥निःकिंचनैःपरम
हंकुलैरसंगैर्जुष्टान्गृहेनिरयवर्त्मनिबद्धतृष्णान्॥१७॥चतुर्थेरुद्रवाक्यंप्रचेतः
सप्रति॥देवदत्तमिमंलब्ध्वान्लोकमजितेंद्रियः॥योनाद्रियेतत्वत्पादौसशोच्योह्यै

स्त्वंवंचकः॥१८॥ इत्यामेयुधिष्ठिरवाक्यंभगवंतंप्रति॥ त्वत्पादुके अविरतंपरियेचरंतिध्या
यंत्यभद्रनशनेशुचयोगृणंति विंदंतितेकमलनाभभवापवर्गमाशासतेयदितआशिष
ईशनान्ये॥१९॥ इत्यामेनागपत्नीवाक्यंभगवंतंप्रति॥ ननाकपृष्ठंनचसार्वभौमंनपारमे २५
ष्ठ्यंनरसाधिपत्यं॥ नयोगसिद्धीरपुनर्भवंवावांछंतियत्पादरजःप्रपन्नाः॥२०॥ इत्यामे
प्रचुकुंदवाक्यंभगवंतंप्रति॥ नकामयेन्यंतवपादसेवनादकिंचनप्रार्थ्यतमाद्वरं
विभो॥ आराध्यकस्त्वांह्यपवर्गदंहरेवृणीतआर्योवरमात्मबंधनं॥२१॥ इत्यामे॰
श्रीहरिपत्नीवाक्यंद्रौपतिप्रति॥ नवयंसाध्विसाम्राज्यंस्वाराज्यंभौज्यमप्युत॥॰
वैराज्यंपारमेष्ठ्यंवाआनंत्यंवाहरेःपदं॥२२॥ कामयामहएतस्यश्रीमत्पादरजः
श्रियः॥ कुचकुंकुमगंधाढ्यंमूर्ध्नावोढुंगदाभृतः॥२३॥ एकादशेश्रीमुकवाक्यंप॰
रिक्षित्प्रति॥ कोनुराजन्निंद्रियवान्मुकुंदचरणांबुजं॥ नभजेत्सर्वतोमृत्युरुपास्या

स्पममरोत्तमैः ॥२४॥ एकादशेकविवाक्यंजनकंप्रति ॥ मन्येकुतश्चिद्भयमच्युतस्य
२१ पादांबुजोपासनमत्रनित्यं ॥ उद्विग्नबुद्धेरसदात्मभावाद्विश्वात्मनायत्रनिवर्त्ततेभीः ॥
॥२५॥ प्रथमेनारदवाक्यंव्यासंप्रति ॥ त्यक्त्वास्वधर्मंचरणांबुजंहरेर्भजन्नपक्वोथप
तेत्ततोयदि ॥ यत्रक्ववाभद्रमभूदमुष्यकिंकोवार्थआप्तोभजतांस्वधर्मतः ॥२६॥ ए
कादशेकरभाजनवाक्यंजनकंप्रति ॥ स्वपादमूलंभजतःप्रियस्यत्यक्तान्यभावस्य
हरिःपरेशः ॥ विकर्मयच्चोत्पतितंकथंचिद्धुनोतिसर्वंहृदिसन्निविष्टः ॥२७॥ एकां
दशेजनकवाक्यंकरभाजनप्रति ॥ कोनुत्वच्चरणांभोजमेवंविद्विसृजत्पुमान् ॥ नि
किंचनानांशांतानांमुनीनांयस्त्वमात्मदः ॥२८॥ दशमेब्रह्मवाक्यंभगवंतंप्रति ॥ ता
वद्भयंद्रविणदेहसुहृन्निमित्तंशोकःस्पृहापरिभवोविपुलश्चलोभः तावन्ममेत्य
सदवग्रहआर्तिमूलंयावन्नतेंघ्रिमभयंप्रवृणीतलोकः ॥२९॥ तृतीयेकपिलवाक्यं

व हेंद्रुतिप्रति॥ज्ञानवैराग्ययुक्तेनभक्तियोगेनयोगिनः॥क्षेमायपादमूलंमेप्रविश्य
त्यकुतोभयं॥३०॥एकादशेकविवाक्यंजनकंप्रति॥इत्यच्युतांघ्रिंभजतोनुवृत्त्या
भक्तिर्विरक्तिर्भगवत्प्रबोधः॥भवंतिवैभागवतस्यराजन्ततःपरांशांतिमुपैतिसा
क्षात्॥४३॥इतिश्रीमत्पुरुषोत्तमचरणारविंदकृपामकरंदविंदुडोन्मीलितवि
वेकतैरभुक्तपरमहंसविष्णुपुरीग्रथितायांश्रीभागवतामृताब्धिलब्धश्रीमद्भ
क्तिरत्नावल्यांपादसेवननामसप्तमंविरचनं॥७ अथार्चनंनिरूपयितुंविरेचनं
मारभ्यते॥तत्रार्चनेनामपूजातत्राचभगवत्पूजयासर्वेषांपूजाकृताभवतीत्या
ह॥१॥चतुर्थेश्रीनारदवाक्यं॥यथातरोर्मूलनिषेचनेनतृप्यंतितत्स्कंधभुजो
पशाखाः॥प्राणोपहाराच्चयथेंद्रियाणांतथैवसर्वार्हणमच्युतेज्या॥१॥षष्ठेब्रह्मवा
क्यं॥यथाहिस्कंधशाखानांतरोर्मूलावसेचनं॥एवमाराधनंविष्णोःसर्वेषामात्म

नश्यद्धि ॥ १ ॥ श्रीशुकवाक्यं ॥ क्रियाकलापैरिदमेव योगिनः श्रद्धान्विताः साधु यजंति
सिद्धये ॥ भूतेंद्रियांतःकरणोपलक्षणं वेदे च तंत्रे च त एव कोविदाः ॥ ३ ॥ दशमे ऋष
भ ऊचुः वसुदेवं प्रति ॥ चित्तस्योपशमोयं वै कविभिः शास्त्रचक्षुषा ॥ दर्शितः सुगमो
योगो धर्मश्चात्ममुदावहः ॥ ४ ॥ अयं स्वस्त्ययनः पंथा द्विजातेर्गृहमेधिनः ॥ यच्छ्रद्ध
याप्तवित्तेन शुक्लेनेज्येत पूरुषं ॥ ५ ॥ सप्तमे प्रल्हादवाक्यं बालकान्प्रति ॥ नैवात्मनः
प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते ॥ यद्यज्जनो भगवते विदधीत
मानं तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः ॥ ६ ॥ चतुर्थे ध्रुववाक्यं भगवंतं प्रति ॥ नूनं वि
मुष्टमतयस्तव मायया ते ये त्वां भवाप्ययविमोक्षणमन्यहेतोः ॥ अर्चयंति कल्पकतरुं
कुणपोपभोग्यमिच्छंति यत्स्पर्शजं निरयेपि नृणां ॥ ७ ॥ अष्टमे ब्रह्मवाक्यं वामनं प्र
ति ॥ यत्पादयोरशठधीः सलिलं प्रदाय दूर्वांकुरैरपि विधाय सतीं सपर्यां ॥ अप्युत्तमां

गतिमसौभजतेत्रिलोकीदाशानविक्लवमनाकथमार्तिमिच्छत ॥ ९ ॥ एकादशेभगव
बद्धावाक्यंउद्धवंप्रति ॥ एवंक्रियायोगपथैःपुमान्वैदिकतांत्रिकैः ॥ अर्चेदुभय
तःसिद्धिंमत्तोविंदत्यभीप्सितां ॥ ६ ॥ इतिश्रीमत्पुरुषोत्तमचरणारविंदमकरं
दविंदुप्रोन्मलिततविवेकरतैरमुक्तपरमहंसविष्णुपुरीग्रथितायांश्रीभागवतामृता
धिलब्धश्रीभगवद्भक्तिरत्नावल्यांअर्चनेनामअष्टमोविरंचनं ॥ ९ ॥ अथवंदनंनि
रूपयितुंविरंचनमारभ्यते ॥ तत्रतावत्भगवद्वंदनप्रवर्त्तिरपिसर्वतोमंगलमित्याह ॥
१ ॥ दशमेअक्रूरवाक्यंभगवंतंप्रति ॥ ममाद्यामंगलंनष्टंफलवांश्चैवमेभवेत ॥ यन्नाम
स्यभगवतोयोगीध्येयांघ्रिपंकजं ॥ १ ॥ दशमेब्रह्मावाक्यंभगवंतंप्रति ॥ तत्तेनुकंपांसुसमी
क्ष्यमाणोभुंजानएवात्मकृतंविपाकं ॥ हृद्वाग्वपुर्भिर्विदधन्नमस्तेजीवेततयोमुक्तिपदेस
दायभाक ॥ २ ॥ षष्ठेश्रीशुकवाक्यंपरीक्षितंप्रति ॥ पतितःस्खलितोवार्तःक्षुत्वावाविव

श्रोगणेन ॥ हरियेनमहत्युच्चैर्मुच्यते सर्वपातकात् ॥३॥ एकादशेक विवाक्यं जनकं
प्रति ॥ खं वायुमग्निं सलिलं मही च ज्योतींषि सत्वानि दिशो द्रुमादीन् ॥ सरित्समुद्रांश्च ह नि २
रेः शरीरं यत्किंचिद्भूतं प्रणमेदनन्यः ॥६॥ इति श्रीमन्मुकुंदध्यानमचरणारविंदकर्ण
मकरंदबिंदुप्रोन्मीलितविवेकानैरमुत्तमपरमहंससविष्णुपुरीयग्रथितायां श्रीभागवता
मृताब्धिलब्धश्रीभगवद्भक्तिरत्नावल्यां वेदत्वेनिरूपयितुं नाम नवमं विरचनं ॥ ९
॥ अथ यदास्यैव निरूपयितुं विरचनमारभ्यते ॥ तत्र तावद्भगवद्दासा एव नाम कृतार्थाः इ
त्याह ॥ १ ॥ नवमे दुर्वासा वाक्यं अंबरीकप्रति ॥ यन्नाम श्रुतिमात्रेण पुमान्भवति नि
र्मलः तस्य तीर्थपदः किं वा दासानामवशिष्यते ॥ १ ॥ दशमे ब्रह्मवाक्यं श्रीकृष्णप्रति ॥
तावद्रागादयः स्तेनास्तावत्कारागृहं गृहं तावन्मोहोंघ्रिनिगडो यावत्कृष्ण न ते जनाः
॥ २ ॥ एकादशेन हंसवाक्यं श्रीकृष्णप्रति ॥ किं चित्रमच्युततवैतदशेषबंधो दासेष्वनन्य

न्वस्थापरतोबुधदात्मसात्वं॥ योरोचयत्सहमगैःस्वयमीश्वराणांश्रीमत्किरीटतटपी-
डितपादपीठः॥ ३॥ एकादशेकविवाक्यंजनकंप्रति॥ कायेनवाचामनसेंद्रियैर्वा
बुद्ध्यात्मनावानुसृतस्वभावात्॥ करोतियद्यत्सकलंपरस्मैनारायणायेति-
समर्पयेत्तत्॥ ६॥ इतिश्रीभगवद्भक्तिरत्नावल्यांदास्यनिरूपणंनामदशमं
विरचनं॥ १०॥ अथभगवतसख्यत्वविरचनमारभ्यते॥ तत्रभगवत्सख्यनाम-
हिमावक्तुंत्वतेननशक्यतेइत्याह॥ १॥ दशमब्रह्मावाक्यंभगवंतंप्रति॥ अहोभा-
ग्यमहोभाग्यंनंदगोपव्रजौकसां॥ यन्मित्रंपरमानंदंपूर्णंब्रह्मसनातनं॥ १॥ पं-
चमेऋषभदेववाक्यं॥ एवंमनःकर्मवशंप्रयुंक्तेअविद्ययात्मन्युपधीयमाने॥
प्रीतिर्नयावन्मयिवासुदेवेनमुच्यतेदेहयोगेनतावत्॥ २॥ इतिश्रीभगवद्भक्ति-
रत्नावल्यांसख्यत्वनिरूपणंनामएकादशविरचनं॥ ११॥ अथात्मनिवेदनं-

निरूपयितुंविरचनमारभ्यते॥ तत्रभगवतिनिवेदितात्मनांततत्कृपयासर्वोपिपु
रुषार्थोभवतीति॥१॥एकादशेभगवद्वचनंउद्धवंप्रति॥मर्त्योयदात्यक्तसमस्तक
र्मानिवेदितात्माविचिकीर्षितोमे॥तदामृतत्वंप्रतिपद्यमानोमयात्मभूयायचक
ल्पतेवै॥२॥सप्तमेप्रल्हादवाक्यं॥धर्मार्थकामइतियोभिहितस्त्रिवर्गइक्षात्रयीन
यदमौविविधाचवार्त्ता॥मन्येतदेतदखिलंनिगमस्यसत्यंस्वात्मार्पणंस्वसुहृदःपर
मस्यपुंसः॥३॥इतिश्रीभगवद्भक्तिरत्नावल्यांआत्मनिवेदनंनामद्वादशविरचनं॥१२
॥अथेहयथोक्तवैदिकलौकिकोक्तविहितसाधनहीनानां॥भगवत्चरणप्रवेश
एवशरणमित्यभिप्रेत्यविरचनमारभ्यते॥१॥एकादशेकरभाजनवाक्यंजनकंप्र
ति॥देवर्षिभूताप्तनृणांपितॄणांनकिंकरोनायमृणीचराजन्॥सर्वात्मनायश्शर
णंशरण्यंगतोमुकुंदंपरिहृत्यकर्तुं॥१॥तृतीयेमैत्रेयवाक्यंविदुरंप्रति॥किंदुरापाद

नैतेषांपुंसामुद्दामचेतसांयेराश्रित्यस्तीर्थेयद्दश्वरणोव्यसनात्ययः॥२॥शारीरामान
सादिव्यावैपासेयेचमानुषामौतिकाश्चकथंक्लेशावाधंतेहरिसंश्रयं॥३॥चतुर्थेरु
द्रवाक्यंप्रचेतसप्रति॥यत्रनिर्विष्टमरणंकृतांतोनाभिमन्यतेविश्वंविध्वंसयंवीर्य
शौर्यविस्फूर्जिताभुवा॥४॥षष्ठेदेवानांवाक्यंवृत्रासुरप्रति॥अविस्मितंतंपरिपूर्ण
काममेश्वैनैवलाभेनसमंप्रशांतं॥विनोपसर्पत्यपरंहिवालिशाःश्वलांगुलेनातितर्ति
सिंधुं॥५॥सप्तमेप्रल्हादवाक्यंश्रीनृसिंहप्रति॥बालस्यनेहशरणंपितरौनृसिंहमा
र्तस्यचागदमुदन्वतिमज्जतोनौः॥तप्तस्यतत्प्रतिविधिर्यइहांजसेष्टस्तावद्विभोतनु
नुभृतांत्वदुपेक्षितानां॥६॥दशमेअक्रूरवाक्यंभगवंतंप्रति॥कःपंडितस्त्वदपरंश
शरणंसमीयाद्भक्तप्रियादृतगिरःसुहृदःकृतज्ञात्॥सर्वान्ददातिसुहृदोभजतोभि
कामानात्मानमप्युपचयापचयौनयस्य॥७॥तृतीयेमैत्रेयंप्रतिउद्धववाक्यं॥अहो

वकीयंस्तनकालकूटंजिघांसयापाययदप्यसाध्वी ॥ लेभेगतिंधात्र्युचितांततोन्यं
किंवादयालुंशरणंव्रजेमः ॥ ६ ॥ एकादशेतुद्धववाक्यंभगवंतेप्रतिः ॥ तापत्रयेणा
भिहतस्यघोरेसंतप्यमानस्यभवाध्वनीश ॥ पश्यामिनान्यच्छरणंतवांघ्रिद्वंद्वात
पत्रादमृताभिवर्षात ॥ ७ ॥ दशमेतुअक्रूरवाक्यंभगवंतेप्रति ॥ चिरमिहवृजिनार्
तस्तप्यमानोनुतापैरवितृषषडमित्रोलब्धशांतिःकथंचित ॥ शरणदसमुपेतस्त्व
त्पादब्जंपरात्मन्नभयमृतमशोकंपाहिमापन्नमीश ॥ ८ ॥ विष्णुपुरीवाक्यं ॥ एवंश्री
श्रीरमणाभवतायत्समुत्तेजितोहं चांचल्येवासकलविषयेसारनिर्धारणेवा श्री
मत्प्रज्ञाविभवबलदृप्तोस्तत्रयत्नेमेमतैः साकंमुक्तैरगतिषुगतेनुग्रिमेहित्वमेव ॥ १
१ ॥ साधूनांस्वतएवसंमतिरिहस्यादेवमन्त्यार्थिं ॥ नामालोच्ययग्रथनक्रममंचविद्धाम
स्मिन्नमवेक्ष्यादरः येकोचित्परक्षत्पुपश्रुतीपरास्तानर्थयेमत्कृतिंभूयोवीक्ष्यव

इत्वंवद्धमिह चेतसा वा मनसा स्थास्यति ॥१२॥ एषः स्यामहमल्पबुद्धिर्विभवोप्यो र
कोपिचेत्तुदवंम च्चैम भक्तजनस्य मत्कृतिरिमं न स्यादवज्ञास्पदं ॥ किंविद्यासरस्वाः
किमुज्वलकुलाः किंपौरुषाः किंगुणास्तत्त्वं किंसुंदरमादरेणरेसिकैर्नापीयतेतन्मधुः
॥२३॥ इत्येषा बहुयत्नतः कृतवता श्रीभक्तिरत्नावलीतन्त्रीत्येवतथैव संप्रकटिता तत्कां
तिमालामया ॥ अत्र श्रीधरसत्तमौक्तिकलिखितेन्यूनाधिकं यत्ततमूतंतत्त्वेतु स्वधि
योर्हृदयस्वरचनालुब्धस्यमेचापलं ॥२६॥ महायज्ञधारपूर्णशशांकेगुणितेशाकेयमा
लुगोप्युक्तपदस्य द्वितीयायां सुमंगले ॥ वाराणस्यां च महेशस्य सन्निधौ हरि
मंदिरे ॥ भक्तिरत्नावली सिद्धा संहिता कांतिमालया ॥२७॥ इति श्रीमत्पुरुषो
त्तमचरणारविंदकृपामकरंदबिंदुप्रोन्मीलितविवेकतैरभुक्तपरमहंसविष्णु
पुरिग्रथितायां श्रीभागवतामृताब्धिलब्धश्रीभगवद्भक्तिरत्नावल्यांशरणेनाम

१ यस्यकंठेस्थिता विष्णुभक्तिरत्नावलिप्रभा सभवत्पतितत्कांतिमालयासकलंनगत १६ 

वत्तिगेतिस्थं घकवृह्मिसात्वनोश्रसीरतांमेभगवान्सतांगतिः १

ति२

पत्तिः ॥ ५ ॥ अथभागवताचार्यशुकंस्तौति प्रथमेसूतवाक्यंशौनकंप्रति ॥ यस्या
रीपम २ नुभावमखिलश्रुतिसागरमेकमध्यात्ममूर्तितितिर्षतांतमोंधं ॥ संसारीणांकरुणयाहपुराणगु ला २
ह्यंतंव्याससूनुमुपयामिगुरुंमुनीनां ॥ ६ ॥ विष्णुपुरिवाक्यं ॥ दुरन्तस्यायमहिमानमुपेर
त्यपार्श्वमतःप्रविषयस्युमभागवतामृताब्धौ ॥ पश्यामिकृष्णकरुणांजननिर्मलेनहस्तो
चनेनभगवज्जनेहिरत्नं ॥ ७ ॥ तदिदमतिमहार्घंभक्तिरत्नंमुरारेरहमधिकमयत्नः १
प्रीतयेवैष्णवानां ॥ हृदिगतजगदीशादेशमासाद्यमाद्यन्निधिवरमिवतस्मादुद्धारिषे
समुद्धरामि ॥ ८ ॥ कंठेकृताकुलमणीघमलंकरोतिवेश्मस्थितानिखिलमेवतमोपहंति
॥ तामुज्वलांगुणवतींजगदीशभक्तिरत्नावलिंसुकृतिनःपरिशीलयंतु ॥ ९ ॥ नि
खिलभागवतश्रवणालसाबहुकथाभिरथानवकाशिनः ॥ अयमयेननुतानवनु
सार्थकोभवतुविष्णुपुरीग्रथनग्रहः ॥ १० ॥ द्वितीयेश्रीशुकवाक्यंपरिक्षितंप्रति ॥ स

वैपुंसांपरोधर्मोयतोभक्तिरधोक्षजे॥अहैतुक्यप्रतिहतायथात्मासंप्रसीदति॥१॥२
वासुदेवेभगवतिभक्तियोगप्रयोजितः॥जनयत्याशुवैराग्यंज्ञानंचयदहैतुकं॥१२॥द्वि
तीयेसूतवाक्यंशौनकंप्रति॥सत्वंरजस्तमइतिप्रकृतेर्गुणास्तैर्युक्तःपरःपुरुषए
कइहास्यधत्ते॥स्थित्यादयेहरिविरिंचिहरेतिसंज्ञाः॥श्रेयांसितत्रखलुसत्वतनोर्नृ
णांस्युः॥१३॥अतोवैकवयोनित्यंभक्तिंपरमयामुदा॥वासुदेवेभगवतिकुर्वंत्यात्म
प्रसादिनी॥१४॥मुमुक्षवोघोररूपान्हित्वाभूतपतीनथ॥नारायणकलाःशांता
भजंतिह्यनसूयवः॥१५॥द्वितीयेश्रीशुकवाक्यंपरीक्षितंप्रति॥अकामःसर्वकामोवा
मोक्षकाममनुदारधीः॥तीव्रेणभक्तियोगेनभजेतपुरुषंपरं॥१६॥वासुदेवपरावेदावा
सुदेवपरामखाः॥वासुदेवपरायोगावासुदेवपराक्रियाः॥१७॥वासुदेवपरंज्ञानंवा
सुदेवपरंतपः॥वासुदेवपरोधर्मोवासुदेवपरागतिः॥१८॥प्रथमेनारदवाक्यंव्या

पे

प

मे प्रति॥ माचिरमियोगं थैकामलोमहतोमुहुः॥ मुकुंदसेवयायद्वत्तथात्माद्धानर
प्राप्स्यति॥ २९॥ प्रथमे सूतवाक्यं शौनकं प्रति॥ भक्तियोगेनमनसिसम्यक्प्रणिहि
तेमले॥ अपश्यत्पुरुषंपूर्णंमायांचतदपाश्रयां॥ ३०॥ तृतीये श्रीकपिलवाक्यं देवहूति
प्रति॥ देवानांगुणलिंगानामानुश्रविककर्मणां॥ सत्वएवैकमनसोवृत्तिःस्वाभा
विकीतुया॥ ३१॥ अनिमित्ताभागवतीभक्तिःसिद्धेर्गरीयसी॥ जरयत्याशुयाकोशंनि
गीर्णमनलोयथा॥ ३२॥ नैकात्मतांमेस्पृहयंतिकेचिन्मत्पादसेवाभिरतामदीहाः॥
येन्योन्यतोभागवताःप्रसह्यसभाजयंतेममपौरुषाणि॥ ३३॥ पश्यंतितेमेरुचिराव
लो तंसंप्रसन्नवक्त्रारुणेक्षणानि॥ रूपाणिदिव्यानिवरप्रदानिसाकंवाचंस्पृहणीयं
वदंति॥ ३४॥ तैर्दर्शनीयावयवैरुदारैर्विलासहासेक्षितवामसूक्तैः॥ हृतात्मनोहृत
प्राणांश्चभक्तिरनिच्छतोमेगतिमण्वींप्रयुंक्ते॥ ३५॥ अथोविभूतिंममतमायाविनस्तामैश्व दे

३

लो०

यैमष्टांगमनुप्रवृत्तं ॥ श्रियं भागवतीं वास्पृहयंति भद्रां परस्य मे तेऽश्नुवते तु लोके ॥ २६ ॥ नकर्हि
चिन्मत्पराः शांतरूपे नङ्क्ष्यंति नो निमिषो लेढि हेतिः ॥ येषामहं प्रिय आत्मा सुतश्च
सखा गुरुः सुहृदो दैवमिष्टं ॥ २७ ॥ इमं लोकं तथैवामुमात्मानमुभयायिनं ॥ आत्मा
३८ नमनु ये चेह ये रायो पशवो गृहाः ॥ २८ ॥ विसृज्य सर्वानन्यांश्च मामेवं विश्वतोमु
खं भजंत्यनन्यया भक्त्या तान्मृत्योरतिपारये ॥ २९ ॥ नान्यत्र मद्भगवतः प्रधानपु
रुषेश्वरात् ॥ आत्मनः सर्वभूतानां भयं तीव्रं निवर्तते ॥ ३० ॥ तस्मात्त्वं सर्वभावे
न भजस्व परमेष्ठिनं ॥ तद्गुणाश्रयया भक्त्या भजनीयपदांबुजं ॥ ३१ ॥ चतुर्थे ध्रु
गीतवाक्यं ध्रुवप्रति ॥ तमेव वत्साश्रय भृत्यवत्सलं मुमुक्षुभिर्मृग्यपदाब्जपद्धति
न२ ॥ अनन्यभावे निजधर्मभाविते मनस्यवस्थाप्य भजस्व पूरुषं ॥ ३२ ॥ नान्यं ततः पद्म
पलाशलोचनाद्दुःखच्छिदं ते मृगयामि कंचन ॥ यो मृग्यते हस्तगृहीतपद्मया श्रि

३

येतरैरंगविमृग्यमाणया ॥३३॥ चतुर्थे पृथुभगवंतप्रतिवाक्यं ॥ अथो भजे त्वाखिलपू
रुषोत्तमं गुणालयं पद्मकरेव लालसः ॥ अप्यावयोरेकपतिःस्पृधोःकलिर्न स्यात्
त्कृतत्वच्चरणैकतानयो ॥३४॥ जगज्जनन्यां जगदीश वैशसं स्यादेव यत्कर्मणि नः
समीहितं ॥ करोषि फल्ग्वप्युरुदीनवत्सलः स्व एव धिष्ण्येऽभिरतस्य किं तया ॥३५॥
चतुर्थे रुद्रप्रचेतसप्रतिवाक्यं ॥ यः परं रंहसः साक्षात्त्रिगुणाज्जीवसंज्ञितात् ॥ भग
वंतं वासुदेवं प्रपन्नः स प्रियो हि मे ॥३६॥ अथ भागवता यूयं प्रिया स्थ भगवान्यथा
॥ न मद्भागवतानां च प्रेयानन्योऽस्ति कर्हिचित् ॥३७॥ सप्तमे प्रल्हादवाक्यं बालकं
प्रति ॥ तत्कर्म हरितोषं यत्सा विद्या तन्मतिर्यया ॥ हरिर्देहभृतामात्मा स्वयं प्रकृति
रीश्वरः ॥३८॥ यस्यास्ति भक्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः ॥ हरावभ
क्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः ॥३९॥ हरिर्हि साक्षाद्भगवान्शरी

क

श्रीहिरिमामात्मारुषाणामिवतोयमीप्सितं ॥ हित्वा महांस्त्वं यदि सज्जते गहे तदा महत्वं
वयसा दंपतीनां ॥ ६० ॥ पंचमे लक्ष्मी वाक्यं भगवंतं प्रति ॥ सवै पतिः स्यादकुतोभयः
त२ स्वयं समंततः पाति भयातुरं जनं ॥ स एक एवेतरथा मिथो भयं नैवात्मलाभादधि मन्य
ते परं ॥ ६१ ॥ पंचमे हनुमान रघुनाथं प्रति वाक्यं ॥ सुरोऽसुरो वाप्यथ वानरो नरः सर्वा
त्मना यः सुकृतज्ञमीश्वरं ॥ भजेत रामं मनुजाकृतिं हरिं य उत्तराननयत्कोशलान्दिवं
॥ ६२ ॥ न जन्म नूनं महतो न सौभगं न वाक् न बुद्धिर्नेचाकृतिस्तोषहेतु ॥ तैर्यद्विसृष्टा
नपि नो वनौकसश्चकार सख्ये बत लक्ष्मणाग्रज ॥ पंचमे देवानां वाक्यं भगवंतं प्रति
॥ सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थदो यत्पुनरर्थिता यतः स्वयं विधत्ते भजतां
मनिच्छतामिच्छापिधानं निजपादपल्लवं ॥ ६३ ॥ सप्तमे प्रल्हाद वाक्यं हिरण्यकस्यपं
प्रति ॥ तत्साधु मन्येऽसुरवर्य देहिनां सदा समुद्विग्नधियामसद्ग्रहात ॥ हित्वात्मपातं गृ

त्रयोदशांविरंचने ॥ १३ ॥ संवत् ॥ १९ ॥ ७१ लिखितंभक्तारत्नावल्या ॥ देवाद्दासपव
नार्थे ॥ लक्ष्मनदासेन ॥ माघेमासेकृष्णेपक्षेद्वादस्यांतिथौशुक्रवासरान्वितायां
तस्मिन्कालेविसेसमाप्तोयं ॥ शुभमस्तु ॥ शिद्धिरस्तु ॥ श्रीरामश्रीरामश्रीरामायनमः

M-87